CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 861 Subject : Vedānta.

Title : Bhūṣaṇa Sāra Darpaṇa

Author : Hari Vallabha. Scribe : –

Date of the work : – Date of the Ms. : V.S. १८६४.

Place of the work : – Place of the Ms. : –

Size : 9·6" by 4·2" Extent : 87 to 169 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : Begins abruptly.

त्तायाः शक्तेरनुपेक्षणीयत्वादिति भावः अनुगृहीतत्वमिति कासहासंदार्थोपस्थितेः शाब्दबोधे [illegible]त्य
र्शना तद्धर्मावच्छिन्नविषयकशाब्दबुद्धिंप्रति तद्धर्मावच्छिन्नार्थनिरूपितवृत्तिविषयकपदज्ञानस्य
रणत्वस्यापदजन्यपदार्थोपस्थितिर्व्यापारः तां विना तदनुत्पत्तेः ननु वृत्तिमत्त्वेन ज्ञातं पदं। अ
न्तानागतशब्दानुसंधानात् शाब्दबोधानुदयप्रसंगात् वृत्तिश्च शक्तिलक्षणाभेदद्विविधा। तत्रा
र्थपदसंकेतः शक्तिः। स चेदं पदमिममर्थं बोधयतु इति पदविशेष्यकेश्वरेच्छात्मकः अस्मात्पदा
दयमर्थो बोध्य इत्याकारकपदार्थविशेष्यकेश्वरेच्छारूपो वा विनिगमकाभावात्। न पाना एवं बो
धकं पदं वाचकमिति व्यवह्रियते। आधुनिकसंकेतः परिभाषा तन्पार्थबोधकं पदं पारिभाषि
कं। यथा नदीवृद्ध्यादिपदं। लक्षणा तु शक्यसंबंधः तत्कल्पिका च मुख्यार्थबाधो न तु तात्पर्यानुप
पत्तिः तथाहि गंगायां घोष इत्यत्र गंगापदस्य घोषाभाववत्प्रवाहार्थकत्वेन तीरतात्पर्यकत्वा
न्नीतेतात्पर्यविषयतीरसंसर्गं विनानुपपद्यमानेन तीरशाब्दबोधेन तन्न मतिरागस्य तत्साच

भ.सा:

गापदवृत्तिं विनानुपपद्यमाना तज्ज्ञानमाक्षिपति तद्विषयो गंगापदनिरूपिता [illegible] शक्तिर्लक्ष
णाभावात् तत्तीरस्मारिकाकाचिदन्यैव वृत्तिः कल्प्यते। सा च गंगापदनिरूपिता शक्यसामीप्य
रूपैव तेन तत्पेरणां ग्रहमाणा तीरं स्मारयत्यनुभावयति च॥ शक्यादशक्योपस्थितिस्तु न तत्
संबन्धेन उपस्थितिहेतोस्तस्यास्तत्त्वासंभवात्। नापि तद्बोध्यसंबंधः समासशक्तिनिरूपणा
कल्पुप्तेः तन्नेश्वरेच्छायाः शक्तित्वासंभवः घटादस्यापि पदे शक्तत्वप्रसंगात्। घटपदाद् घटबोधो
भवत्विति इच्छाया विषयतया घटेऽपि सत्त्वात्। यदि चेश्वरेच्छीयघटपदजन्यबोधविषयत्वप्रकारता
निरूपितविशेष्यत्वं शक्तिरिति न घटपदेतिप्रसंगः न हि विषयत्वेपि तादृशविषयत्वनिष्ठप्रकार
तानिरूपितविशेष्यत्वस्य तत्रानभ्युपगमादित्युच्यते। तदापि गंगापदात्तीरबोधस्यापीच्छापि
तत्वेन तन्मात्रविषयकेश्वरेच्छीयगंगापदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यत्व
रे सत्त्वाच्छक्त्यैव निर्वाहे कृतं लक्षणयेति चेन्न गंगापदवाच्यत्वव्यवहारस्य तीरादावभा

पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेनेश्वरेच्छैव गंगा [illegible]
प्रवाहादौ शक्तिः तीरादिनिष्ठविशेष्यतायाश्च गंगादिपदजन्यबोधविषयत्वप्रकारतानि [illegible]
त्वेपि न तस्यास्तादृशविषयतात्वेन तादृशप्रकारतानिरूपितत्वमपि तु शुद्धविषयतात्वेनेवे [illegible]
पगमात्तन्न पालक्षणान्यथासिद्धिर्नापि विषयत्वलक्षणासंबंधस्य पदजन्यजनकभावे सत्त्वे [illegible]
तत्रातिप्रसंगः तत्र लक्ष्योपस्थितिनियामकः सादृश्यात्मकः संबंधो गौणी तदतिरिक्तस्तु शुद्धो
लक्षणेति व्यवह्रियते। शुद्धाप्युपादानलक्षणाभेदेन द्विविधा। तत्र मुख्यसंसर्गान्यार्थोपस्था [illegible]
पकत्वमुपादानत्वं। शक्यविषयकस्यार्थोपस्थितिजनकत्वं लक्षणात्वं यष्टीः प्रवेशय गंगायां
घोषोपदस्यादिके यथाक्रममुदाहरणं। तत्राप्याद्या जहत्स्वार्था परा अजहत्स्वार्थेति सुध्यते। तन्मते [illegible]
तएवानन्यत्वं धार्यार्थानिर्नेयापिकाम्माद्ऽः मीमांसकास्तु। उक्तयुक्त्या लाक्षणिकपदस्य [illegible]
पकत्वपरिहारेपि नेश्वरेच्छायाः शक्तित्वं ईश्वरस्यैवानभ्युपगमात्। न चेच्छामात्रीयत्वाद [illegible]

भा॰सा॰ पादेयमेवं चाधुनिकसंकेतज्ञानादपि शाब्दबोधोदयेन तादृशसंकेतस्य वृत्तिता निर्वाहः आधु
कसंकेतत्वेन तात्पर्यस्यापि वृत्तित्वप्रसंगस्तु नापदार्थोपस्थितिनियामकसंकेतस्यैव वृत्तित्वेन
तस्यातत्त्वात्। तत्त्वात्तस्य सादृश्यादेव शाब्दधीजनकतया पदार्थोपस्थित्यात्मकव्यापारानपेक्ष
णात् वृत्त्युपस्थापितार्थस्य व्यमकरणादिना तदवधारणात्॥ आधुनिकसंकेतितडित्थादिपदे
षु चाधुनिकसंकेतस्य भागवधारितस्य डित्थादिव्यक्तिशाब्दधीजनकपदार्थोपस्थितौ नियामक
त्वेन तद्वृत्तित्वस्य सौलभ्यादिति चेदेवमपि संकेतस्य निरूढियोगिनपातञ्जलीयोक्तविषयस्याप
पानरमणीयत्तया संबंधत्वासंभवेन पदार्थानुपस्थापकत्वाद्वृत्तित्वानिर्वाहात्। तस्मात्स्वष
ष्ठवाच्यवाचकभावनियामकः संबंधः पदार्थांतरमेव। नाप्यसौ समवेतो भावादेरपि सत्त्वात्
वैशिष्ट्याख्येनसंबंधांतरेणावर्ततेतत्साऽः वाच्यत्वं यथा तसमवायित्वाविच्छपाशवपि
किंतु वैशिष्ट्याख्येन संबंधांतरेणावर्ततेतत्साऽः वाच्यत्वं यथा तसमवायित्वाच्छ्यत

दीधितिकृतापि तत्मतमेवाभ्युपगन्तं तदेतन्नानामतानि निराकर्तुमाह सैन तत्त्वरूपप्रदर्शनमिति
मत्सममवतारयति तस्याः स्वरूपमिति। तस्याः शक्तेः निर्विषयत्वां नेषां कथं घटादिर्विषयो न
चाक्षुषेति। तथा चौपचारिकविषयत्वं न विरुद्धमिति भावः चाक्षुषपदं त्वाचादिप्रत्यक्षस्याप्युप
लक्षणं इंद्रियनिष्ठचाक्षुषादिकारणतायामनादित्वं इंद्रियजन्यपूर्वपूर्वबोधध्वंसकालिकत्वं च रू
पादिव्यापकत्वं पुरुषप्रयत्नानपेक्षत्वं चानन्यजन्यत्वमप्यावनेकत्वात्। शब्दनिष्ठबोधकारणताया
यां तु स्वजन्यबोधसमानाकारपूर्वपूर्वबोधध्वंसवत्त्वं। तद्बोधकारणतो। अर्थबोधकत्वं। तापमा
नपदेकरसतमभिप्रेत्येदं॥ अन्यथाविषयतया तादृशहेतुतावच्छेदकनेत्यर्थो बोध्यः संकेतत्वानं
विनोक्तशक्तिग्रहासंभवेनावश्यापेक्षणीयतस्यैव शक्तित्वमस्तु न हेतोरेवेति न्यायादित्याशंकते
नन्विति। तस्याः शक्तित्वे हेतुराधुनिके साद्रि। आधुनिके। एतत्कालिकसंकेते नविशिष्टे। तदभावात्। नि
रूक्तानादित्वविशेषणविशिष्टबोधकारणत्वाभावादित्यर्थः। विशेष्यसत्त्वेपि प्रकृते विशेषणा

भो॰सा

अपृथक्विशिष्टाभाववत्त्वेनतदप्रतियोगित्वनप्रकारतात्वेनसंभवतीत्यर्थः नन्वनादिभ्रमतेतिप्र
द्धिमद्दर्शनमात्रार्थकंन तु तच्छक्तिशरीरेप्रविष्टं येननन्वद्दूपेणानस्यहेतुतासंभाव्येनकिंतुवे
धकारणत्वत्वेनैव। यद्धतेतेनरूपेण तज्ज्ञानेवाधकाभावइतिचेत्स्यादेव पदिसंकेतग्रहमन
वेरोवतइहोभवेत्तत्तु न तत्संभवतीसाहान्यथेति। संकेतनिरपेक्षस्यैव तस्य शाब्दबोधहेतुत्वे
इत्यर्थः ताहृशितांकेति। तन्त्राप्यनादिभ्रमतस्यापि बोधजनकत्वस्य सत्त्वादिति भावः अवच
श्यकत्वादिति। अवश्यापेक्षणीयज्ञानविषयत्वादित्यर्थः सत्त्वा संकेतस्त्वात् एवकारेणाबोधक
त्वव्यवच्छेदः संकेतस्यस्वरूपतः कारणत्वं ज्ञानस्य वा तस्यापि सामान्यतो विशेषरूपेणवाहेत
त्वाभिमतमिति विकल्प्य दूषयति तु यत इति। स्वरूपेणेति स्वस्य यद्रूपमिति नित्यत्वसाधार
धर्मेणसंकेतत्वेनेत्यर्थः इदन्त्वेनघटेदंइत्यादिज्ञानाविषयत्वसंकेतः संकेतत्वेनहेतुत्वेइति
अगृहीतशक्तिकादिति।। अज्ञातसंकेतादित्यर्थः अर्थबोधप्रसंगादिति। संकेतस्य

नत्वादिति भावः सामान्यत इति। जनकाजनकसाधारणधर्मेणेत्यर्थः संकेतत्वेनेति। इ...य
केतत्वादिताविशेषधर्मेणेत्यर्थः तज्ज्ञानमनुष्यानामिति। संकेतईश्वरीयत्वसविद्रूपामिते...
बोधोदयेनेति अर्थधीजनकत्वज्ञानमात्राहवाद्यर्थबोधोदयेनेत्यर्थः पघापि संकेतत्वेन सं...
ज्ञानकारणतावादिमतेनेश्वरीयत्वादेर्निवेशस्तथापि गवादावीश्वरस्येति तदयासो चन पे
रीयत्वादेर्निवेशस्तदभिमत इत्यभिप्रेत्य दूषितमिति ध्येयं लौकिकमीमांसकानामिति। वैदिकान
कल्पविशिष्टेश्वरबोधसंभवात् इत्यते लौकिकेति। अपचालौकिकानां व्यावहारिकपदार्थमात्रविषयक
नवतांप्रामाणामिति यावत् मीमांसकानां चेत्यर्थः न तदर्थः नतदर्थधीजनकत्वग्रहवतामेवे
सेवकारेणानिरूक्तसंकेतज्ञानवत्त्वव्यवच्छेदः सच तज्ज्ञानमनुष्यानामित्यस्यैवानुवादः एवमन्यपदा
दत्तसुगमः इदं च शक्तिग्रहनप्रकारगाम्बर्शकं। तज्ज्ञाने। संकेतपा। हेतुसंकेतितत्पदस्यैवार्थ
जनकत्वेनपदनिष्ठजनकतायां संकेतस्यावच्छेदकत्वादिति भावः ततोपीति। अर्थधीजनक...

भा॰सा॰ छेदकत्वस्याहेतुतावच्छेदकत्वकल्पनापेक्षया पदधीजनकतात्वेन हेतुताकल्पनायां लाघवोचितत्वेन
याकरणोक्तसिद्धेरित्यर्थः इदं पदमेतदर्थनिरूपितसंकेतवदितिसाकारकपदविशेष्यकज्ञानस्
यधीजनकत्वावच्छेदकतावच्छिन्नसंकेतप्रकारताकज्ञानत्वेन हेतुत्वकल्पनापेक्षया इदं पदमेत
दर्थधीजनकमितिज्ञानस्यैवार्थधीजनकतावच्छिन्नप्रकारकज्ञानत्वेन हेतुत्वकल्पनालाघवी
यसीतिभावः संकेतज्ञानादेरेवैतेनार्थधीजनकत्वग्रहसंभवात् इत्यत आह स्वस्य बोधकत्वग्रहस्याप्य
भिचारः व्यतिरेके। तत्रापि संकेतमात्रादर्थबोधस्य लोपापत्तेरित्यर्थः इष्टापत्तिमाह इति। इदं पदविशेष्य
केनदर्थबोधकत्वप्रकारकेत्याग्रहे इत्यर्थः अवगाहनेनेति विषयीकरणेनेत्यर्थः ज्ञाने तच्छादि
षयत्वज्ञानस्य तद्विषयविषयकत्वनियमादितिभावः स्वांशे तस्यैवं निर्ज्ञातविशेषणत्वेनेत्यर्थः
कृतेचेत्यंशे विषयितया विशेषणीभूतबोधकत्वस्यैव तज्ज्ञानेन विषयीकरणादितिभावः
येति। पातं तस्यैवमपि बोधकताज्ञानस्य शाब्दधीहेतुत्वे इत्यर्थः इष्टापत्तिनिराकरणाय

धीजनकमितीति। अस्माच्छब्दादिति। एतच्छब्दजन्येतदाश्रयकबोधविषयोऽपमर्थ
रकवर्तमानत्वग्रहवत इत्यर्थः पदविशेष्यकार्थधीजनकत्वबाधग्रहे विद्यमाने तदंशे अर्थधी
त्वावगाहिनः इदं पदमेतदर्थधीजनकत्वेन बुद्ध्यमनेनेतिग्रहासंभवात् इत्युपहासास्पदमित्या
रकबोधग्रह उक्तस्य तस्मिन्वस्तुनि तस्य प्रतिबंधकतोऽग्रहाभावानवगाहित्वादिति भावः तदुह
पत्तेरिति। घटादिशाब्दबोधापत्तेरित्यर्थः उक्तज्ञानस्य विषयविषयकत्वेऽपि तत्तत्पदांशे अर्थबो
धकत्वं विषयीक्रियते न शक्तिग्रहत्वं तस्य स्यात् किंतु बोधांशे तत्पदजन्यत्वस्यापि अंशे तादृशबो
धविषयत्वमेव तत्पातेन तुल्यवित्तिवेद्यत्वं पापदांशे अप्यबोधकस्यमप्यवगाह्य तदितिदर्शितं तु दृष्टं
चेतुल्यवित्तिवेद्यत्वेमानाभावात् तत्प्रतिबंधकस्य ग्रहस्याभावानवगाहिनो तदंतत् धीजनकमिति ज्ञान
स्य ज्ञानगतत्वात् ज्ञानवत्पदनिष्ठार्थधीजनकत्ववद्यंति पदजन्यबोधविषयत्वेमपि शक्ति विं
गमनाविरहात् दृष्टपविधज्ञानाच्छाब्दबोधस्य सर्वानुभवसिद्धत्वात्कार्यतावच्छेदककोटि

भासा: व्यहितोत्तरत्वनिवेशश्च न परजन्यशाब्दबोधे व्यभिचारः एवं च द्वितीयपक्षे शक्तिग्रहज्ञानसमाच्छाद्वे
पत्तिः सुकरे निवार्यं न तथा सतीदं मर्थधीजनकमिति निग्याख्याभावानवगाहिनोप्रतिबंधकस्य हरणोपन्न
सवैयर्थ्यान्नग्नाख्याभावानवगाहित्वेप्युभयविधशक्तिग्रहं प्रसज्य यत्र्यतिरेकत्रयोःप्रतिबंधकत्वो
पगमेन ततद्रूपन्यासस्य सार्थक्यसंपादनेन तज्ज्ञानस्यासंभवएव तथा शयेन तद्रूपप्रतिबंधेन द्वी
जनकमिति वाधेन अप्रामाण्यज्ञानानास्कंदितनिरूढनिर्णयास्य कस्य प्रतिबंधकस्याभ्युपेतेनस
र्थेः न तद्ग्रहासंभवात् । अर्थविशेष्यकपदजन्यबोधविषयत्वग्रहासंभवादित्यर्थः अन्यपेतिम
ध्यमहेपिज्ञापमानस्य रजनं बुद्धमतेने नियमहस्य इदं विशेष्यकरजनप्रकारकज्ञानहत्वेन अन्यो नि
स्यपनेन तद्दोषाभाववत्त्वमपि सच्यते अन्तःख्यापने इति नवभाववतिन दवगाहित्वान वन
वन्त्वादिति भावः । अन्येदं विरस्यं यत्रेदं यत्रेमे तदर्थबोधयोस्त्वति संबंधेन ज्ञानमात्राच्छाद्व
न्वोधकताशक्तिज्ञानस्य हेतुतादिमते व्यभिचारादूरूद्धरएवानवच्छिन्नत्रसंबंधेन ज्ञानमेवच्छ

ततपानघटितताव्यवहितोत्तरत्वसंबंधेनोपस्थितिमत्त्वस्य कार्य्यतावच्छेदककोटौ निवेशः ...व्य
रणाभावान्नेत्यस्मिति भावः न्यायसाम्याद्याह किंचेति । प्राग्वदेवेति । शक्तिज्ञानं विनापि स...
ज्ञानास्य शाब्दोपस्थितेरेवं सत्त्वरणात्ज्ञानं विनापि शक्तिज्ञानास्य शाब्दोपस्थितेस्तयोरूपस्थितिहे
तापां परस्परं व्यभिचारः अव्यवहितोत्तरत्वसंबंधेन तत्तत्कारणवैशिष्ट्यस्य कार्य्यतावच्छेदककोटौ नि
शोचंगोरचं न हृदेवेपर्थः ननु बोधकत्वशक्तिवादिनोपि गंगापदं प्रवाहबोधकमिति शक्तिग्रहाद
दर्थोपस्थितिशाब्दबोधयोरापत्तिवारणाय कारणतावच्छे[illegible]कोतत्तदर्थनिवेशश्चाव
श्यकत्वपाचलस्य रणादिमतेन कगौरवमित्याशंक्य निराचष्टे । नचेति । परस्परेति । गंगापदनि
ष्ठतीरबोधकत्वग्रहं [illegible]विनापि तीरादिपदनिष्ठताट्टशशक्तिग्रहेणापि तीरबोधानयोः परस्परजन्यबो
धेव्यभिचारप्रतिरोधाय सर्पः शक्तिभ्रमानुरोधेन निगंगापदस्य तीरे शक्तिभ्रमस्यायांतीरोपर्थ
स्यादेः सर्वमतसिद्धत्वया न चापितत्कारणतावच्छेदककोटौ ननस्पदनतदर्थनिवेशस्यावश्य...

मु.सा. दित्यर्थः नवेति लक्षणास्वीकर्तुरित्यर्थः शक्तिज्ञानकारणतायां शक्तेश्शक्तित्वेन निवेशस्यादेषो न
षुः किंतु वृत्तित्वेनेति वक्तुः संभावनेत्याशंकते नेत्यपेति वाच्यमितीति॥ शक्तिजन्योपस्थिताविवरस्स
जन्योपस्थितावविशक्तिलक्षणासाधारणवृत्तित्वावच्छिन्नजन्यत्वस्त्वादिति भावः शक्तिलक्षण
ति। शक्तिभिन्नत्वे सति लक्षणाभिन्नं यत् भिन्नत्वस्येत्यर्थः शाब्दबोधानुकूलेत्यादि शाब्दबोध
जनिकायाः पदार्थोपस्थितिः पदवृत्तिज्ञानजन्योपस्थितिस्तदनुकूलेत्यर्थः कारणतावच्छेदक
त्वे उभयसाधारणं हेतुमाह। गुरुत्वादिति। अस्मदभिमतशक्तित्वमपेक्ष्य निरुक्तान्यतर
त्वादेर्गुरुत्वादित्यर्थः द्वितीयं हेतुपरिणामांतरमप्याह। शाब्दबोधे हेत्विति शाब्दबोधजनकत्वज्ञ
नस्य कारणतावच्छेदकोपस्थित्यधीनत्वेन तस्य च पदवृत्तिज्ञानजन्योपस्थितित्वात्मकत्वपा
ज्ञानस्य स्वघटकवृत्तित्वज्ञानं विनाऽसंभवेन कार्य्यकारणभावग्रहस्य दुर्घटत्वादित्यर्थः तथा
त्वग्रहतत्त्वस्योन्याश्रयेणोक्तस्य वृत्तित्वासंभवादिति भावः॥ वस्तुतस्तु विजातीयपदा

त्तिजनकपदपदार्थयोः संबंधो वृत्तिः वैजात्यस्य निवेशात्तु नाकाशोपस्थितिजनकसमवायेऽप्य
वृत्तिव्याप्तिः नन्वाह शाब्देजात्यपरिचायकं च शाब्दबोधानुकूलेति। न तु तेन रूपेणोपस्थितौ
हेतुत्वं निर्मलक्षणास्पर्शत्वमिति। ममापीति। लक्षणांगीकर्तुरपीत्यर्थः प्रवेशादिति। तथा
लक्षणाज्ञानस्यापि शक्तिज्ञानत्वेनैव हेतुत्वेन न लक्षणाज्ञानजन्यलक्षणार्थोपस्थित्यादेः श
क्तिज्ञानस्य हेतुतायां व्यभिचार इत्यर्थः विषयमनिवेश्यैवेति शक्तिज्ञानपदार्थोपस्थित्योः कार्य
कारणभावः संभवेत् तदा स्यादेषु रूपप्रकारः स एव न संभवतीत्याह शक्तिज्ञानेत्यवश्यकत्वा
दिति तदर्थं विषयकोपस्थितिं प्रति तदर्थनिरूपितवृत्तिनिष्ठशक्तिज्ञानत्वेन हेतुताया आवश्य
कत्वादित्यर्थः आवश्यकत्वमेवाहान्यथेति शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारण
भावे समानविषयकत्वानिवेशे इत्यर्थः संबंधाग्रहेण नद्यसुत्ता लक्षणाज्ञानासत्त्वे बोधितं
गापदे इति प्रवाहरूपार्थे निरूपितबोधकत्वशक्तिं गंगापदे जानतः इत्यर्थः तीरबोधप्रसंग इति। मु.सा.

स्थितेस्तत्प्रकारकशाब्दबोधस्यचापत्तिरित्यर्थः ननुतात्पर्यनिवारणायवृत्तिज्ञानपदार्थोपस्थितेः शाब्द-
बोधेकिंबाधकमतआह॥ अपिचेति। हस्तिपदस्य तेर्वृत्तिज्ञानजन्यत्वसंपन्नये हस्तिनोपिवा-
यस्मृतिविषयताबोधिता। समूहालंबनेसत्त्वात्आलंबनपदंविषयपरं। वृत्तिजन्योपस्थितिरिति। तद्वि-
षयकत्वावच्छिन्नवृत्तिज्ञाननिष्ठकारणतानिरूपितकार्यतावच्छेदकधर्मावच्छिन्नोपस्थितिरि-
त्यर्थः उक्तस्थलेहस्तिपदकोपस्थितेर्वृत्तिज्ञानजन्यत्वेपिनतन्निष्ठजन्यताहस्तिपदविषयकत्वे-
नावच्छिन्नेनापिवृत्तिज्ञाननिष्ठजनकतायांहस्तिविषयत्वेनावच्छेदकत्वात्वृत्तिज्ञानेधर्मसं-
भवद्वृत्तिकमिति। लक्षणाज्ञानस्यशक्तिविषयकत्वेपितीरविषयकशक्तिग्रहात्मकत्वाभाव-
दितिभावः एतेनेति। द्विविधवृत्तिज्ञानस्यैकतयोपगमहेतुत्वासंभवप्रतिपादनेनेत्यर्थः शक्तिप्र-
ज्येतिलक्षणाज्ञानस्यशक्तिज्ञानाधीनत्वेनतज्जन्योपस्थितेःशक्तिप्रयोज्यत्वसत्वान्नस-
वादिमतेहेत्वंतरकल्पनेत्यर्थः अन्यतेतिप्रसक्तस्येति। जन्यजन्यत्वस्यलक्षणाज्ञान-

तावित्वविशेषणतावच्छेदकप्रकारकनिर्णयविधयाशक्तिज्ञानजन्यघटपदशक्यत्वादेश...प
कारकविशिष्टवैशिष्ट्यावगाहिज्ञानानुव्यवसायात्मकबोधेपिसत्वात्ततोपिगुरुशाब्दबो-
पत्तिः साक्षाज्जन्योपस्थितेरसंग्रहश्चसाक्षाज्जन्यत्वस्यतत्वेतुलक्षणाज्ञानजन्योपस्थित्यसंग्र-
हस्तुभयसाधारणंतस्यचक्रमशक्यत्वेनपसंबंधेनप्रस्तुतस्यानुगतस्योभयसाधारणं
पंतुसुतरामसंभावितमितिभावः अन्यथासिद्धिनिरूपकतानवच्छेदकशक्तिज्ञाननियतोन
स्वर्तितावच्छेदकधर्मवत्वरूपंशक्तिप्रयोज्यत्वमुभयसाधारणंसुवचमित्यपिकेचित्। अधिकम
ग्रेवक्ष्यते॥ अन्वयबंदेति। अर्थबोधजनकत्वस्यवृत्तेःपदनिष्ठस्यवाच्यवाचकव्यवहारनिया-
मकशक्तित्वसंभवस्योक्तकार्यकारणभावेगौरवलाघवादिचर्चानुत्पत्तदूपत्वसंभवः
तथाहि। शाब्दबोधंप्रतिवृत्तिज्ञानस्यहेतुतेतिर्निर्विवादं॥ साक्षभवद्कार्यधीजनकत्वस्यवृत्ति-
त्वेनसंभवति। तद्रूपावास्तस्याज्ञानविषयतावृत्तिधीजनकतापामवच्छेदकत्वासंभवान्। स्वोप-

वत्तावच्छेदकत्वन्यात्मात्राश्रयातू किंच प्रयोज्यप्रयोजकव्यवहारदर्शनप्रयोज्यप्रवृत्त्यनुमितेन प्र
ज्ञानिष्ठघटानयनादिज्ञानं तदुपस्थितनत्वाच्छब्दस्यैव हेतुतायामवधार्य्यमाणायामस्यैव वृत्त्यके
रणत्वानुपपमाकल्प्यमानसंबंधस्य जनकत्वारमणकत्वासंभवः स्वयमनुपपद्यमानत्वेन गृही
तस्यम्नहेतुमशक्यत्वात्॥ स्मात्तबोधकत्वं शक्तिः एवंन्यायमताभ्युपेतस्या स्मात्पदादे
तदर्थबोधो भवत्विसाकारकेश्वरेच्छाविषयत्वस्यापि संकेतीयगंगापदजन्यस्य प्रकारता
निरूपितबोधत्वावच्छिन्नोद्देश्यतानिरूपितविशेष्यत्वरूपावच्छेदकतानिरूपिताधेय
त्वसंबंधावच्छिन्नावच्छेदकत्वपर्य्यवसितस्यनशक्तित्वात् लक्षणेच्छादापत्तेः गंगापदज्ञानी
यावधोऽस्येतगंगापदज्ञातीरविशेष्यकबोधो भवत्विति च्छायाम्नपि भागवस्याः संभवात्
दृशेच्छीयतिरूपावच्छेदकतायाम स्येतीरेपि संभवात् तादृशावच्छेदकतात्वेन शक्तित्वात्
शाब्दबोधेकारणत्वकल्पनेगौरवं च तीरादिनिष्ठावच्छेदकतायाः प्रत्येकं विशेष्य
नं

च्छेदकतानिरूपितत्वेपि न विशेष्यत्वस्य अवच्छेदकतात्वेन नत्तिनष्यत्वं किं तु शुद्धावच्छेदकताम
ननादृशशक्तिस्तीरऽ तितु विशेष्यपतारणामात्रं। इच्छाविषयत्वंज्ञानविषयत्वं वा शक्तिरि
गमनाविरहाच्चुम्राधिकमन्येव स्यात्। नस्मात्पदपदार्थयोर्वाच्यवाचकभावव्यवहारानिय
संबंधः पदार्थानरमेव। तस्य चलत्सप्राकृतसेवधर्मिग्राहकमानसिद्धत्वात्तत्रस्यबोधाय
च्यसंबंधनपलक्षणाद्दनेरपिस्वीकारस्यावश्यकः तज्ज्ञानस्य शाब्दबोधे हेतुत्वान रकल्पनप्रयु
क्तगौरवंतु फलमुखत्वान्न दोषावहं। अन्यथानुपपत्तेश्च। अत एव शास्त्रस्यव्यवहारः स्वरस
तः संगच्छते। अपवाशक्तिलक्षणाज्ञानयोः शाब्दबोधं प्रत्येकरूपेणोवहेतुता। न याहि तच्छा
ब्दं प्रति शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्रकारतानिरूपितत
विशेष्यताप्रज्ञानत्वेन हेतुता। शक्तिसंबंधेन शब्दसंबंधेन वा पदप्रकारकज्ञानेन शक्तेः संसर्गत
या शक्तित्वनिष्ठावच्छेदकतापर्य्याप्त्यैसेरविवेशिशेन शक्तसंबंधप्रकारकज्ञानस्यापि न न

शेकरणात्। परंतु पदनिष्ठप्रकारतानिरूपिततादृशसांसर्गिकविषयतायामर्थविशेष्यतान
निरूपितत्वानभ्युपगमान्न शक्तिसंबंधेन पदाभावप्रकारकबुद्धिमतिव्याप्तं तस्य तानस्य
पारणाभ्यासादिह रिपदस्य तत्यमर्थः इंद्रियाणां चाक्षुषादिविषयेषु घटादिषु पुरुषप्रयत्नानपे
क्षप्राप्यायोग्यतानवीयचाक्षुषादिकारणतावच्छेदकत्वापत्तिन पार्थैः साकमपि पदानां संब
धोपयोग्यताऽनवच्छिन्नबोधजनकतावच्छेदकधर्मो न तु जनकत्वमेवोक्तयुक्तेरिति निरूपणं द्विरो धोपो
त्तिसर्वमनवद्यमिति तदाह कुत्र व्याकरणस्येत्यादि। ननु केवं शक्तिग्रहं व्याकरणोपमानकोशाप्त
वाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धाः इति तत्र व्या
करणादिकं साधुत्वसहकृतमेव शक्तिग्राहकमिति नैयायिकमतं। यतो साधुत्वसहकृतेन तस्यः कर्मृ
तिसन्नेणकृतावेव शक्तिः परिच्छिद्यते न तु कृतेरो तिपूर्वेन तथोक्तं। एवं गुणसंख्यादपद इति को
पिसाधुत्वसहकृतेन गुणस्य वशक्तिर्निर्दृष्यते न तु गुणिनि गोरवाद्गुणिवाचकपदानाम

देशवाक्यार्थस्मृतिद्वारा गवयादिर्गवयादिपदवाच्य इति शक्तिपरिच्छेदकत्वं। इदमेतद्धे दि
साकारकोसवासादर्पितहहः व्यासत्वं च तदर्थविषयकयथार्थज्ञानवत्त्वं॥ व्यवहाराच्च प्र
योजकवृद्धेन घटमानयेत्युक्ते प्रयोजकवृद्धेनानीते घटे पार्श्वस्थो घटकर्मकानयनं यनत्
दिकार्यं घटकर्मकानयनादिज्ञानसाध्यमित्यनुमिमीते व्यवहारेऽप्रवृत्तं ज्ञानस्य हे
ता नच्चानेन तेन हेतुजिज्ञासायामुपस्थितेन तद्वाक्यमेव नह्व हेतुत्वेनावधारयति। तस्य चाप
संबद्धस्य न हेतुपदस्यार्थेन साकं प्रश्नाद्युपस्य संबंधमवधारयति सैव शक्तिरिति व्यवहियते
यद्यपि प्रथमं तेन वाक्यस्यैव वाक्यार्थेऽवधारितः स तथापि घटं नय गामानयेत्यादावापोद्वापाभ्यां
प्रत्येकपदशक्तिग्रहेण प्राग्ज्ञातवाक्यशक्तिग्रहे चंद्रदेऽपीति। शास्त्राध्येयमनु
न्यशात पोजनादिपरिमाणग्रहेण प्राग्भ्यासेन प्रापमिकास्य परिमाणग्रह इत्याप्रामाणं
गस्यते इति नैयायिकाः प्रत्येकपदशक्तिग्रहेऽणेवाक्यास्रादिसहकृतेन वाक्यपर्यवाधोपपत्तेर्युक्ते

भ:सा:

तस्याशयः अन्येतु वाक्यार्थे शक्तिग्रहस्य प्रत्येकपदशक्यपदार्थोपस्थानेन नतद्बाधासंभवेन प्राय
शक्तिग्रहस्यैवबुसत्वमित्याहुः वाक्यशेषात्तु पदैर्न्तुहीतोऽस्त्र यवपदस्य दीर्घश्लक्ष्णविशिष्टे अ
णांप्रयोगात्संयोगेच्छानांप्रयोगात्कथंनाकिरितिसंदेहे यच्चान्या ओषधयो म्लायन्ते अथैते मो
दमानाइवोत्तिष्ठतीति वाक्यशेषेण दीर्घश्लक्ष्णविशिष्टे तन्निर्णयः विषरणस्यय पाशं किंवा ह
कत्वं तथा धात्वर्थे निरूपणं उक्तं इह सहकारतरोमधुरं पिकोरौतीति सादौ प्रसिद्धसहकारा वि
पसन्निधानात्पिकादिपदानां कोकिलादौ शक्तिपरिच्छित्तिरिति। सेघ्राशक्तिनांनानार्थेषु संयोगादि
नानियम्यते। तदुक्तं काव्यप्रकाशे। संयोगो विप्रयोगश्च साहचर्यं विरोधिता अर्थः प्रकरणं
लिंगं शब्दस्यान्यस्य सन्निधिः सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः शब्दार्थस्या
च्छेदे विशेषस्मृतिहेतव इति। शब्दार्थस्यानवच्छेदे संदेहे तन्निरासहायविशेषनिर्णयस्यज
संयोगादय इति तदर्थः शक्त्योपस्थितानामनेकेषामेकतरमात्रार्थतात्पर्यनिर्णयप्र

र्थबोधकत्वं तेषामिति भावः तत्र सवत्साधेनुरवत्साधेनुरितिक्रमेणासयोगवि भि...प
योरुदाहरणे। साहचर्यं साहश्यं। सहशयोरेवमापृशः सहमयोगादेवंचरामलक्ष्मणावि
रावभयोर्नानार्थयोर्युगपदेवसाहचर्यग्रहाधीनतात्पर्यग्रहेण विशेषावगतिरिति नान्यो
न्ययः रामार्जुनगतिस्तयोरित्यादौ विरोधेन सा। अंजलिना जुहोत्यंजलिनादित्यमुपतिष्ठत इ
त्यादौ धात्वर्थवशात्तदाकारांजलिपरत्वं सैंधवमानयेत्यादौ तु भोजनादिरूपप्रकरणेन सा:
न्यतः शङ्करा उपदधातीत्यादौ तेजो वै घृतमित्यादिघृतादिस्तुतिरूपालिंगादेकपदस्य घृ
तसाधनांतत्वेनात्पर्यावगतिः रामो जामदग्न्य इत्यादौ तु जामदग्न्यपदसन्निधानेन रामपदस्य पर
शुरामपरता एवमभिरूपाय कन्यादेयेत्यत्राभिरूपतनयेति सामर्थ्यादवगम्यते। यम्बुनि
वेपरस्तु नेत्यत्रौचित्यापरशब्दपदस्य छेदनार्थत्वं भात्यत्र परमेश्वर इत्यत्र राजधीनो नप दे
शास्यरमेश्वरपदस्य राजपरत्वं चित्रभानुर्भातीत्यत्र चित्रभानुपदं रात्रौ वह्नेर्दिवा सूर्यस्य

धकं भिन्नो भातीत्यादौ त्यके लिंगाशश्वेसु दृष्टोपि सर्पस्याबोधकं भिन्नपदं। स्थलपद्मतीमनछ
ही मित्यत्र खरानसुरूपबहुव्रीहिस्वर्थत्विर्णपः अर्थादिपदान्यत्वणत्वादि। पप्यासुसितं मित्य
त्र सुशब्दस्य कर्मप्रवचनीयस्य पूजार्थकत्वे। सुषितं मित्यत्रोपसर्गस्यानर्थकत्वमेवं प्र
णायक इत्यत्र णत्वात्प्रणायूनकत्वे बोधः प्रनायक इत्यत्र तदभावात्य गगनतनायकबोध
इत्याद्यूह्यं। यत्तु पदपदार्थयोर्योर्थः स शब्दोपश्शब्दः सोर्थ इतीनरेतरा ध्यासमसत्यकं ताद्य
संभेदव्याप्तकमस्ति। तस्य वाचकः प्रणवः ओमित्येकाक्षरं ब्रह्मेति भेदाभेदयोर्दर्शनात्।
उ आद्ये भेदस्याभ्दन्तत्वविवक्षया षष्ठी। अभेदस्याभ्दन्तत्वविवक्षयात्वं स्य प्रातिपदिका
र्थे प्रथमा। स एव संबंधः पदतदर्थयोर्वाच्यवाचकभावव्यवहार। निपातमयः शक्तिनं तु
केनः पदार्थान्तरं वेति भवतु नुयापिमतं न तु नसाधीयः अध्यासमलक्ष्यासतनस संबं
ता संभवान्। भेदाभेदयोः परस्पराभावरूपतया विरुद्धत्वेनैकत्रासंभवाच्च। कस्य

ध्यास संभवेपि सर्वेषां तथाध्यासे मानाभावात् घटपदनाशेपि घटस्योपलभ्यमान [illegible] य
पोस्तादात्म्य सा संभवत्तु निकतात्र। न च पाकरके पाकृष्णमेपि पाको न रमयमिदानीन [illegible]
मइति प्रतीतेर्मेदाभेदेन विरुद्धाविति वाच्यं। अव्याप्यवृत्तीनामेषामेकावच्छेदेन विरो
धानपायात्। अन्नतस्यतत्र देशकालावच्छेदकभेदेनैवायमिदानीन्तनश्यामोप्यसोमले
न कपि संयोगी नितत्तु नदनवगाहिनी घटोयं न प्रमा मोह्यस्येन कपि संयोगीति प्रतीतिः
किं त्वभेदवादे घटपदनाशे घटनाशापत्तिरेवं शब्दवदर्थस्यापि श्रोत्रेन्द्रियग्राह्यतापत्तिः श
ब्दस्य च चक्षुरादीन्द्रियग्राह्यतापत्तिरिति बहुव्याकोपः शब्दस्य प्रधानत्वस्यं तपाच
स्यते। न चास्यं तभेदे घटः पटोस्यं ताभेदे घटो घट इति सामानाधिकरण्यादर्शनाद्भेदाभेद
वादेपपत्तिरिति शंक्यं। शब्दो घट इत्यात्मनुभवात्घटेन शब्दः शब्देन घट इत्यननुभवाच्च
भेदस्यैवास्ति हेतुः ओमित्येकाक्षरमित्यादौ त्वक्षरपदस्य लक्षणा प्रणवे निरूढलक्षणा पासा [illegible]

श॰ सा॰

नाधिकरणेपोपपत्तेस्तद्वाक्यस्योपासनाकाङ्क्षत्वपाभेदेप्यभेदोपासनपरत्वोपपत्तेश्चेत्सं
त्रविस्तरः साच शक्तिस्त्रिधा योगो रूढिर्योगरूढिश्चेति। प्रकृतिप्रत्ययनिरूपिता तत्तदर्थे पार
क्तिः स योगः तन्मात्रेणार्थबोधकपदं यौगिकमिति व्यवह्रियते। यथा पाचकादिपदं तत्र घट
कधातुप्रत्यययोः पाकादौ कर्त्रादिप्रकारके च शक्तत्वात्। अवयवार्थप्रतीतिं विनैव समुदा
यस्य तदर्थे या शक्तिः सा रूढिस्तन्मात्रबोधकं पदं रूढं। यथा मणिनूपुरादि। अश्वगंधादिपदात्तु
कस्याचिद्विशेषस्य विशिष्टसमुदायनिरूपितशक्त्यौषधिबोधः कदाचित्तु अश्वस्य गंधोस्यामिति व्युत्प
त्त्या वाजिशालादिबोधोपपद्यत इति यौगिकरूढिः पङ्कजमौक्तिकं पोरेवांतर्भावात् रूढियोगा
पहारिणीति तु प्रकरणाद्यभावे। लाक्षणिकं तद्धि शक्यार्थबोधकत्वपरे। यत्रावयवार्थ
रूढ्यर्थयोः समुदायशक्तिरर्थबोधिका सा योगरूढिस्तया अर्थबोधकपदं योगरूढं यथा पङ्कजा
दि तत्र पङ्काधिकरणकोत्पत्त्याश्रयपद्मत्वविशिष्टबोधात्। अनुपपत्तिप्रतिसंधानं

पद्मबोधानात्। लक्षणा वस्तुत्वादिमपंचितं पर्वमेव। गंगायां घोष इत्यादौ गंगापदस्य
तीरे शक्यसामीप्यरूपलक्षणाग्रहे तदाहितसंस्कारजन्यतीरादिसमुपस्थिती राधिकरणत्वे
षशाब्दबुद्धिः स च शक्यवृत्तिरन्वयानुपपत्त्या लक्षणापाश्च प्रवृत्तस्य शक्यस्यैव पत्वात्। अन्वया
नुपपत्तिप्रतिसंधानं च न लक्ष्यत्वे बीजं। यष्टीः प्रवेशयेत्यादौ कुन्ताः प्रविशन्तीत्यादावपि न दृष्टं। यथा वदृ
तस्याव यदंनमुखममुखं भाति चास्यास्यामिसत्वं तादात्म्य संबंधावच्छिन्नत्वबदनत्वावच्छि
न्नप्रकारताकनिरूपितवदनत्वावच्छिन्नविशेष्यताकबोधो न संभवति। तादात्म्य संबंध
वच्छिन्नतादृशप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धौ विधेयतावच्छेद
स्यतेन्दुत्वादिनिवदनत्वावच्छिन्नापेक्षणपदनिरंतरं चिनाकांक्षानवदनपदे तेस्तत्र वदनपदं
त्वस्य लक्षणापाठादकपरनदूपं स्यितादृशस्वसावच्छिन्नस्याभेदान्वयो बदने। अनुशासन
बोधितनैराकांक्ष्यमपिधाचित्तत्वादयथाहुनसीतासरित्यागः सरत्नाकरमेखला। वसुधा

भ॰ सा॰

पृथिवीपालः पृथिवीमेवकेवलंपालयितुमभुजिधातोरवनवाचकस्यात्मनेपदनिराकांक्षत्वत प
आर्थवृद्धौप्रतिवद्धायांतद्वारातुनास्वार्थपालनबुद्धिखन्यापोग्यत्वन प नेराकांक्षस्य भुजो न
न इति सूत्रेणबोधनात्॥ तत्र केवलपदेनतत्कालिकरामाभिन्नपृथिवीपालकर्तृकभोगक
र्मतिष्ठान्योन्याभावप्रतियोगितानवच्छेदकैकत्वयोगिनीव्यक्तिरभिधीयते। एकारेण पृथि
व्यन्ययोगव्यवच्छेदः एवं चतत्कालिकरामाभिन्नपृथिवीपालकर्तृकभोगकर्मनिष्ठान्योन्यो
न्याभावप्रतियोगितानवच्छेदकैकत्वविशिष्टाभिन्नपृथिवीकर्मकभोगकर्त्ता पृथिव्यन्य
न्नीकर्मकभोगाकर्त्तारामाभिन्नः पृथिवीपालइतिन्यायेनयेवाक्यार्थबोधः द्विरेफो मधु
ररौतिद्विरेफः कूजतिकाननइत्यादौतुमुख्यार्थबाधएवलक्षणाबीजंकिंतुसालक्षितलक्ष
णुयन्नेतल्लसमासार्थेरेफद्वयविशिष्टघटितत्वात तस्याः तथाहि येन पुरुषेणाद्विरेफाविट
रूपप्राणिविशेषेनद्विनेगृहीतावितुद्विरेफपदेयत्रेनिव्युत्पत्त्यारेफद्वयसंबंधिभ्रमरपदे

~~पृथिवीपालः पृथिवीमेवकेवलमभियम्यभुजिधातोरवनवाचकस्यात्मनेपदनिराकांक्षत्वत~~
~~र्थवृद्धौप्रतिवद्धायांतद्वारातुनास्वार्थपालन~~ संबंधरूपलक्षणागृहीतातरूपप्राणिविशे
षेष्वकमधुरारवकर्तृत्वशाब्दबोधस्यतात्पर्यविषयस्यानुपपत्त्याद्विरेफपदात्लक्षणरेफ
द्वयदिनपदवाच्यत्वलक्षणापोपस्थितेप्राणिविशेषेमधुरावकर्तृत्वान्वयइतिद्विरेफपदेन
भ्रमरपदस्मृपस्थाप्यनेनेनचप्राणिविशेषोपस्थितिरितितुनसम्यक्। भ्रमरपदानामिनिवृत्तते
तत्रपरस्परापर्यान्वयासंभवात्। भ्रमरपदेलक्षणापामपितनेनतदुपस्थितिरूचरितस्येवापे
प्रसायकत्वाद्दित्याहुः एवं द्विरेफः कूजतिकाननइत्यादावपिबोध्यं एवं गंगाहरतिवेपुंसांह
प्यापीतावगाहितेस्यच्चपीतागंगापापंहरतीतिवाक्येगंगापदात्प्रवशक्यप्रवाहोवपुंसा
वपविभावसंबंधरूपलक्षणाग्रहाहितसंस्कारसहकृतात्उपस्थितोहतजलोपानकर्मत्वा
न्वयः तात्पर्यानुपपत्तिरेववासर्वत्रलक्षणावीजं। नेदृक्त्वापकत्वेनेवोत्तरेराकांक्षादीनामु

म.सा.

प्रयोगः। अत एव प्रष्ठीः प्रवेशयेत्यादौ पञ्चादिपदानां न द्वारकत्वेऽपि लक्षणा। यष्टीः प्रवेशय
मत्वान्वयानुपपत्त्यभावेऽपि भोजनादिप्रकरणे ज्ञातेन तात्पर्यविषयभोजनप्रयोजनकप्रवेश
कर्मत्वानुपपत्तेस्तत्र जागरूकत्वात्। एवं कुन्ताः प्रविशन्तीत्यत्रापि तात्पर्यानुपपत्त्यैव प्रयुक्तं। ननु छ
त्रिशब्दस्य पदद्वयघटितत्वेनवाक्यत्वेन पारम्पर्यापन्नयेकार्थं न स्यात् लक्षणा। शक्यासम्भवे हि किं चान्न
नैकसार्थ्यं गङ्गात्वेन सम्बन्धावच्छेदकं। पंतीरस्यानन्वयापत्तेः। गङ्गात्वेनोपस्थितस्य गङ्गापदेनाकांक्षा
विरहादिति चेत्सत्यं। संबन्धिशक्तमनुपपन्नं तत्रैव कसार्थसंबन्धिलक्षकत्वाभ्युपगमेनोक्तदोषद्व
यस्याप्रसक्तेः। न च छत्रपदवैयर्थ्यं तस्य तात्पर्यग्राहकत्वेन सार्थकत्वात् लाक्षणिकं पदं न रत्न
भावकमिति संप्रदायः। स्वशक्यानुभवं प्रसेव पदानां कारणत्वाद् नत्वयं शक्यं न स्वस्वशक्य
नुभावकत्वेन हि साधोषादिपदादेवतीरानुभवोपपत्तेः शक्यादशक्योपस्थितिर्लक्षणे
भ्युपगच्छतां मते तज्जन्योपस्थितिसंबन्धेनैव पदस्यानुभावकतया तस्याश्चतीरप

पपत्तेः शक्यादशक्योपस्थितिर्लक्षणेत्यभ्युपगच्छतां मते स्वजन्योपस्थितिसंबन्धेनैव पदस्य
वकतया तस्याश्च तीरादावभावात्तस्यानुभावकत्वमिति तन्मतं। न च तत्संभवति शक्योपः
नतीरादेरप्रकृतत्वेन यातत्र प्रसयापान्वयासंभवात्। वस्तुतस्तु लाक्षणिकं पदमुद्देश्यविधे
भावेनान्वयाजनकमित्येव न दर्पः उद्देश्यविधेयभावेनान्वयेशक्तिमत्त्वस्यैव तन्त्रत्वात्। अत एव
नञ्विधेयपरः शब्दार्थ इति संगच्छते किं च तन्तुसंयोगस्य पटसंयोगहेतुत्वतात्पर्यकेतन्तुः पटं जन
यतीति सर्वलाक्षणिकवाक्येऽन्वयानुभवापपत्तेर्लाक्षणिकपदस्यानुभावकत्वमेवन्याय्यं गंगा
पदतीरमनुवासीति प्रतीतेश्च तादृशप्रवादेनाभिनिवेष्टव्यं। ननु स्वापत्यांग नमिति तिति तिवुसने
ननु व्याप्तिज्ञाने। न च छत्रान्तानामपि शब्दबोधदर्शनात् गाव्यादयः परं शण्नां गवादिशब्दविकृति
नोद्बोधकविषयाः। इति प्रकृतिस्मारकत्वादिसाधारणेन व्याचष्टे भ्रमेण साधुशब्दमिति।
नुमीयते। एवं च स्वपर्यायः प्रसज्यते तेषां साधुस्मरणस्यैवोपयोगः इति। अपभ्रंशानां सासाधुसंः

भ॰सा॰ कत्वानुन॥ शाब्दजनकसाधुत्वस्याभावात्साधुत्वज्ञानस्य न निर्वंधकत्वाद्देतिभावः नचन्हो
मन्निमाह। उक्तेहीतिते। अपभ्रंशाः साधुष्विति विषयसप्तमी। साधुविषयकस्मरणेनेस
प्रत्यये तिगवाद्युपवोधकारणानीत्यर्थः प्रसंगं निरसमाह नाशक्यमिति। साधुगवादिशब्दज्ञान
त्वप्रकारकज्ञानविषयतामापन्नं वेत्यर्थः एवकारोवार्थे। गोपदे उच्चारणीयत्वकरणापादवेन
गावीसुघारितेवस्तुतो गोपदमेवेदमिति तादात्म्येनभासमानागाव्यादिशब्दाद्गवादिज्ञापार्थ्येस
प्रकाशकाइत्यर्थः नचवस्तुमात्रारेरकत्वाभेदः तत्रापभ्रंशगतानुपूर्व्याएवशक्ततावच्छेदक
त्वात्तन्नसाधुगतायास्तस्यास्तत्त्वमिति भेदादिति भावः एतुशब्दार्थैपोस्तादात्म्यशक्तिरिति
स्वोक्तार्थे तादात्म्यमित्यादिहरिकारिकाई स्योपष्टंभकतयोपन्यस्तेन तस्यैव तादात्म्यस्य
त्वेपि शब्दनिष्ठशब्दतादात्म्यज्ञानस्यार्थबोधकत्वेन तस्य शक्तित्वासंभवात्। उपक्रमे
हारपर्यालोचनया साधुशब्दतादात्म्यभ्रमस्यापभ्रंशानामर्थबोधजनकत्वमिति प्रसं

रपेवन व्याख्यानस्पष्टेत्यादिति। अवाचकत्वेपुंक्तिमाहनशिष्टैरिति। एतस्तेपंभ्रंशासाधवेत [illegible]
पर्यायाद्वशिष्टैः स्वप्यादिनातप्रतिपाद्यन्ते तेनवाचकाइत्यर्थः नसाधुष्विसाधुत्वमर्थे वि
दयन्तिः वंवंवेत्यादि। अव्ययत्वमितिभावरणान्त्रिपाविशेषणां। नद्विष्टं। अव्ययत्वशब्दस्तोत्रदरणानेन।
साधुविकृत्यपभ्रंशास्वरणेन। व्यन्ते। अपभ्रंशप्रकृतिसाधुशब्देस्मृतेसतीतिशेषः निरर्णयः
नंदर्थे शाब्दबोधोभवतीत्यर्थः एवमितिइत्थंवेत्यर्थः साधोर्गवादिशब्देअपभ्रंशाः गाव्यादिः
तेन। असाधुशब्देन। साधुव्यवहितः साधुस्मृतिहारकः कश्चित्समसिद्धोवादिनः अभिधीयते
वोध्यतइत्यर्थः उभेवार्थे दृष्टपितुमाशंकते। नविति। तेषां। साधुपर्यायाणां। एकत्वादिति। ए
कजातीयत्वादित्यर्थः नचास्येकजातीयत्वं येन तत्रापि विनिगमकाभावात्सृष्टिकल्पनास्यादिति भा
वः अभ्युपेत्येति। एकजातीयत्वस्य शक्तिकल्पनापामतेन्यत्वे शक्तिमत्त्वाविशेषात्साधूनामिवापभ्रं
भ्रंशानामपि कोशादौ प्रतिपादनं प्रसज्येतेत्यर्थः एतन्मतेनेनैवेति। ते साधुष्वनुमानेनेसाधुव

भः साः

मतेनैवेत्यर्थः अपभ्रंशाद्बोधस्योत्कीसोपपादितत्वात्तत्र शक्तिकल्पनं स्यादत आह म्लेच्छमि-
शंकानिराचिकीर्षुस्तन्त्रोक्तप्रकारासंभवं दर्शयति। अयं भाव इति। नास्तीति। साधुशब्दा नि-
त्यर्थः अत एवेत्यनुमाह पामराणामिति। बाधादिति। व्यवहारे तेषां बोधानुमानादित्य-
र्थः तथा चानधीनशास्त्राणां तेषां साधुत्वप्रकारकशक्तिज्ञानासंभवेन न न च साधुशब्दस्म-
तिकल्पनापि शाब्दबुद्धिरुपपादयितुं शक्येति भावः किंच साधुशब्दस्मृतिकल्पमाकल्पे किंसंभ-
वेदपि पयदिमसत्वत्र न साधुशब्दानितेषां बोधोदयः स्यादस्त्वेवं तु नास्तीत्याह तेषां साधोरिति
शक्तिभ्रमादिति॥ अर्थे नितरां पुनरपि नायाः साधुशब्दनिष्ठायाः शक्तेरपभ्रंशे भ्रमादित्यर्थः किं बो-
धकत्वस्येति द्वितीयेत्वाईश्वरेच्छेति सन्नमोच्येति। मान्यपदं हन्तार्थकं। अपभ्रंशाद्बोधस्य
बोनुभवसिद्धत्वेन बोधकत्वेनेश्वरेच्छाया अपि तत्भावाधेन मादापापिन शक्तिज्ञानस्य भ्र-
त्वसंपत्तिः प्रतीतेर्भ्रमत्वे विषयबाधस्यैव तन्त्रत्वादिति भावः ननु साक्षात्ताकल्पत्वापभ्रंशे शक्ति-

चकव्यवहाराभावेन तत्साधुत्वेनेश्वरेच्छानुपशक्तेस्तत्र भ्रमे बाधकाभावो नत्याह शक्तेरित्य-
मासंभवादिति नत्सद्विशेष्यकत्वं दर्थबोधजनकत्वप्रकारकेच्छाया स्तत्सद्विशेष्यकत्वेने-
च्छानायाः पदानरविशेष्यकत्वासंभवेन इमासंभवादित्यर्थः अपभ्रंशाभिप्रायेण। पभि-
क्तनविशेष्यत्वन्तपापारत्वत्वं धावच्छिन्नावच्छेदकत्वन्तपापाः पदापांतरन्तपापावापावाश-
क्तेस्तत्र भ्रमेबाधकाभावादिति बोध्यं। न चाच भ्रमेणापि बोधस्य दुरुपपादत्वेन भावायो-
शक्तिरावश्यकेति भावः अस्मिन्नपि पक्षे हरिसंमतिमादर्शयति। नुक्तं चेति पारंपर्यादि जि-
ज्ञातार्थे वाचकविगुणोऽप्यभिहितगर्भे विशेषणांवैगुण्यं चकरणापाटवेनपंभ्र अभिधातृवैगुण्यप
स्यापभ्रंशशक्तिपामकत्वान। न चाचविगुणोऽप्यभिधातृषस्त सपरं परयायेष्वर्थेषु मसिद्धि-
गतानित्यर्थः दैवीति संस्कृतनरपेस्यर्थः अशक्तेः करणापाटववैदिः अवकीर्णानुच्छिन्नानुप-
ब्राह्मणेनेत्यर्थः अनिसदर्शीनां। शब्दानित्यत्ववादिनां अस्मिन्वादे। शक्तिविचारे इत्यर्थः न-

म: सा:

षांसाधुरवाचकइत्यनुपपन्नं। यस्मिन्नर्थेऽपभ्रंशाः प्रयुज्यंते तद्वाचकत्वस्य साधुषु सर्वसं
त्वादते आचष्ट अवबोधक इति। अवहितः साधुर्नतत्र बोधकः किंतु सास्नादपभ्रंश एव न त
नुपूर्वीमत्वेन वाचक इति भावः न त्वियं अयमपभ्रंशानुपावाकू॥ अभिधात्वे गुरुपेनोद्धिन्ना
पूर्वीकापि दैवी संस्कृतेनतु पैर्वानेयायिकानां तस्याबोधकत्वे भ्रमस्य वा पारंपर्यादिसु पा
नोऽसाधुतादात्म्यभ्रांतिमूलकशक्तिभ्रमेण वा बोधकत्वसंभवादित्यर्थकं दैवी वाग्व्यवकीर्णेयं
मित्यपि पूर्वोक्तं तिमकस्यैवोपोद्बलकं नदैवं चेन्नेषां साधुरवाचक इत्यनुपपन्नं नकल्प्य आरोपित
साधुत्वकोपभ्रंशानां बोधकत्वेन साधुस्मरणाद्यो धान अभ्युपगमात् तेषामित्यादेः साधुतादा
त्म्यारोपविषयास्त एव प्रसिद्धार्थानां बोधका न तु नतदानुपूर्वीमत्वेन बोधका इत्यर्थो नस्म
न्नोक्तत्वापभ्रंशानां तत्वेन वाचकतासिद्धिरन आह किंचेति तासां भाषाणां द्वोषइ ति
व्येरवान्न तत्रशक्तिरित्यर्थः सकलदेशशिष्टपरिगृहीतत्वमेव विनिगमकमन आह

प

छेदिके नियोधजनकतावच्छेदिके सत्यर्थः नपोरिति। साध्वपभ्रंशयोरित्यर्थः सकलशिष्टपरिगृह्य
नत्वं तु न विनिगमकं। शवतिर्गतिकर्मा कंबोजेषु प्रयुज्यते विकार एवैनमार्या भाषंत इति भा
ष्यान्न देशनियमसंस्कृतेषु शक्तिसिद्धेनापत्तेः वाचकस्य व्यंजकतापामासंकारिकाणां प्रा
कृतभाषायाह रणस्यासंगतत्वान्नि ष्वान्यन एव न तद्देशीयशिष्टानां ननन्वापासुनिः संदिग्ध
शाकत्वस्य यः संगच्छते। न चासौ भ्रमः बाधकाभावादिति भावः उपसंहरति। तथा चेति। अप
भ्रंशानामपि शक्तत्वे। तेषां अपभ्रंशानां। साधुतास्यादिति। शक्तत्वस्यैव साधुत्वादिति भा
वः साधुभिर्भाषितव्यमिति अपंसाधनेवप्रयुंजीतेत्यादि न प्रश्नेत्यर्थः नासाधुभिरिति।
नापभ्रंशितवैमलेच्छितवैइत्यादिनिषेधविधिरित्यर्थः योग्यत्वंजनकतावच्छेदक धर्मवत्वं।
तत्र साधुशब्दे जनितिरिति। तत्र प्रमाणान्तरेकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे ले
के कामधुग्भवतीत्येकः पर्वपरयोरित्यत्रस्य भाष्ये पठितश्रुतिः सम्यग्ज्ञातः साधुत्वेनरा

भ.सा: यदिहपतिनिष्ठितंतत्साधित्वपर्यायमितिसम्प्रदायेनचततःशास्त्रान्वितः शास्त्रव्युत्पादनमा
त्राभिसंहितः सुप्रयुक्तः शिष्टाद्युक्तमार्गेण प्रयुक्तः इति तदर्थः नेहेलयो हेलय इति कुर्वन्तः प
राबभूवुरिति श्रुतिस्थपदे चकत्वादिना सांकर्य्यान्न तस्य जातित्वमिति विभाव्यते तदा स्त
पाधिरिति भावः तद्वनुमापमिति तदभिव्यंजकमित्यर्थः यथेन तयोक्तं। व्याकरणादीस्या
दिपदाच्छिष्टप्रयुक्तत्वपरिग्रहः एवमेवेतिनतदर्थं पुरस्कारेणात न च्छन्दसां साधुत्वपर्य्य
वसानलाभेनैवेत्यर्थः फलाजनकत्ववदिति तच्चियाधिकारिकृतस्येव तस्य फलम्भ्रंशेणादि
तिभाष्यः साधुत्वमितिः गवाद्यर्थपुरस्कारेणौघगवादिशब्दानां प्रयोगेपुण्यजनकत्वरूपं साधु
त्वमित्यर्थः नन्वाधुनिकदेवदत्तादिपुरस्कारेण देवदत्तादिशब्दानां शास्त्रेऽव्युत्पादनात्तेषां देवद
त्तादेःसाधुता न स्यादत आह आधुनिकेति घञ् प्रत्ययमिति घोषवदाद्यन्तरं नस्यंअन्तरं चतुरक्षरं
पुरुषस्य नामकृतं कुर्य्यान्न तद्धितमिति भाष्यस्यस्य स्वेत्यर्थः नतद्देशभाषानुसारेणाक्रियमाण

गुणोत्वशब्देऽशुक्लादिनपेक्षुत्पादनादिति। गुणवचनेभ्योमतुपोलुगिष्टइतिस्मृत्याशुणोऽशुक्लादयः.
नाम्नांतुशास्त्राव्युत्पन्नत्वादसाधुत्वमेवेतिभावः गौणानामितिशुक्लादिशब्दानामित्यर्थः पुंसीत्य
कोशेनेवेत्यस्या। पुंसीत्यादिकोशेनेवेत्यस्यादिः तत्पुरस्कारेण नीलाद्यर्थपुरस्कारेणेत्यर्थः प्रवृत्तौ गु
णेतिप्रयोगे। शब्दार्थसंबाधेऽन्वयानुपपत्तिप्रतिसंधानानैर्लक्षणार्थोपस्थापनेऽपि शक्यार्थमाद
यतेषांसाधुत्वंनानुपपन्नं शक्यार्थपुरस्कारेण तेषांशास्त्रव्युत्पन्नत्वादित्यर्थः गौणपदस्य निरूढ
लाक्षणिकपदोपलक्षणत्वात्तु नगणपांघोषइत्यादौ गंगादिपदानामसाधुत्वमिति भावः अ
धुनिकानामितिसंज्ञिरूपकिंचित्संबंधेन शास्त्रेकृतानां स्वार्थेविषयेऽप्रयुक्तानामित्यर्थः शक्तिग्रहोप
पत्तेदं च पित्राद्युक्तसंकेतज्ञाना दृश्यतेइतिस्वयंप्रदर्शनादाह। अन्यतिरिक्ते नित्यो कोपादादिति
कोपः शक्तिग्रहोपायसत्त्वमित्यर्थः तथा चानन्ततसंकेतानां न शक्तिग्रहां संभवात्तदर्थव्यवहारान
पपत्त्युपायमाहेति पर्य्यवसानान्नसंगतिरिति भावः एतेनग्रंथकृतावोधकतातिरिक्तशक्ते
रंगीकारेणतद्ग्रहोपायप्रदर्शनंव्यर्थमित्याशंकापिसमाहिता विषयपदाध्याहारेण मलं [illegible]

भा.सा.

षष्ठेसंबंधोविषयइत्यि। तथाचायमेतत्संबंधीतिव्यवहारेसंबंधोविषयः योग्यतांप्रतिइदमत्र
योग्यमितियोग्यताव्यवहारेयोग्यताविषयोपनीतः समयात् व्यवहारः योग्यतापात्रोधकतानुप:
केःसंविन्। ज्ञानंभवतीत्यर्थः तत्रहृष्यंतोमातापुत्रादियोग्यवद्विति। यथायमेतत्संबंधीति
व्यवहारस्तयोर्जन्यजनकभावनिश्चायकस्तद्वदित्यर्थः अन्येत्विदंहरिपदमिंत्संख्याचसंतान्
बंधिशब्देअयमेतत्संबंधीतिव्यवहारे। योग्यतांप्रतिः अर्थबोधजनकतावच्छेदकधर्मवत्त्वन
पयोग्यताव्यवहारनिरूपितोपस्तादात्म्यलक्षणोन्योवासंबंधास्तएवयोग्यतापरपर्याया य:
विषयइतिशेषः सचानादिःवृद्धव्यवहारपरंपरापर्यायास्मदादिसमपात्तिस्त्वीपनेतनतुबोध
जनकत्वमेवशक्तिरेनतद्बोधजनतेयंयोग्यइतिव्यवहारात्। अतएवतच्छेषेसतिप्रसयहेतु
संसंबंधेउपपद्यते। शब्दस्यार्थेयत्तत्समात्संबंधोस्तीतिगम्यतइत्यनेनोक्तार्थःस्पष्टीकृतःइ
अधिकमन्यत्रोपधार्यं ३६ इतिभूषणसारदर्पणेशक्तिरत्नयनिरूपणं समासेत्वलु

वेत्यत्रपंकजशब्दवदितिवदतासमासेतुघटकप्रत्येकशक्तिसहकृतसमुदायशक्तेर्व्यपेक्षासोप्य
कृतेनतन्नानुपपत्तं। पत्रसमासघटकप्रत्येकपदस्यानर्थकत्वंतत्रप्रत्येकशक्तिसाविधासंभवा
पानजसमासघटकनजः नपोरर्थाभिधानेहिव्यापारोनैवविधतइत्युक्तेरेवंजहत्स्वार्थावादे
इवेहशास्यलेउत्तरपदार्थादिप्राधान्यस्यस्वरसतोनुपपत्तिरपीतीमांशकोपरिहृतंतुनजर्थेत्ति
नपराभिसाहत्तजत्थंमितिमतेनउत्तमासइत्ति। अपंभावः घटोनपटोनास्तीत्यादावभावशाब्दबो
धस्यसार्वजनीनप्रसिद्धत्वान्नञोभावार्थकत्वमावश्यकंतथाचोत्तरपदार्थप्राधान्यादिव्यवस्था
सुलभायद्यपिघटोनेत्यादावभावविशेष्यकएवबोधस्तथाप्यसर्वइत्यादावनुरोधेनारोपितत्व
र्थकत्वमपिनञोगीकरणीयमितिनिशेषपरणेनव्यापथेत्सारेसिद्धनीतिरप्रतएवेतिप्राधान्या
नुपपत्तेरेवेत्यर्थः ननुनञस्तत्राभावार्थकत्वेकपंप्राधान्यानुपपत्तिरित्यतोभावार्थमाहा
र्थेभावइति। अन्यथान्यारोपितत्वार्थकत्वानुपगमेमेवार्थकत्वइतिपावतः सासर्वनापर्यवसि:

१०७ नस्यादिति। असर्वद्रस्यत्ननञोभेदार्थ्यकत्वेनत्र प्रतियोगितयासर्वपदार्थस्योपसर्जनत्वेनत्र
ञोपसर्जनानांसर्वादिवहिर्भूतत्वेनातिसर्वद्रस्याद्याविवनद्र प्रवृत्तेरितिभावः ननुभेदप्रतियोगि
गीसर्वद्रतिनन्त्ववोधाभ्युपगमान्नोत्तरपदार्थस्यप्राधान्यहानिरतआह घटोनास्तीत्यादाविति
नित्तस्यान्ननर्थस्यनञर्थाभावत्वस्यविशेष्यतापन्नत्वादितिभावः ननुनवाप्यघटः पदइ
त्यनीघटभिन्नः पदइतिसर्वसिद्धप्रतीत्यनुपपत्तिरतआहास्मद्रीत्येतिसंभेदयोधः आर्थे न
इतिअर्थाद्रुपस्थितिविषयाद्यागतद्रसर्थःमानसद्रति। तत्रशाब्दत्वमस्यपरत्वसिद्धत्वेतिभावः।प
नन्वसर्वशद्वस्यसर्वनामत्वाभावेकस्तत्रितआह तथाचेति। अत्रचेत्यारोपितत्वं नञ्वाच्य
मितिकस्येचेसर्थःतिक्कर्थद्रतिविषयत्वस्यसंसर्गेमप्यादेयेवत्वाभावात्तमलभ्यारोपस्येवनञर्थ
त्वंनत्वारोपविषयत्वंगोरवादितिभावः नन्वारोपस्यवाच्यत्वाभ्युपगमेघोनत्कनाप्रतिपादक
विरोधोतआह घोस्यनोक्तिरिति। वाच्यस्यापितस्यविशेषणानेवनाभाववद्विशेष्यनेतिसर्व

परंतयोक्तिरितिभावः घटोनास्तीति। यद्यपिसमासयोऽपनञस्त्वारोपार्थकत्वंमते उक्तं तथापि
घटोनास्तीत्युक्तिरन्नेवृतत्वाप्यारोपाननुभवइतिहृद्यांतार्थत्यवधेयं। नञ्घोत्यमित्यत्र नञोवि
शेषणातपाधान्यवधानेनचोपस्थितत्वेपिसदादीनांबुद्धिस्थपरामर्शकत्वानदातत्सरामर्शेना
नुचितइत्याहनदर्थोनञर्थइति॥ साधारणेपतेति। प्रकृतेत्यर्थपदस्यतज्जन्यवोधविषयप
रतपापसहृयस्यसंग्रहः तत्रासतिवाधकेवाचकत्वमेवसतितुतस्मिन्द्योतकतापीतिभावः
नञ्वाच्यत्वादिति। यद्यपुत्तरपदार्थप्राधान्येननञ्सूत्रस्यप्रवृत्तिस्त्रमात्रस्यानपर्थंप्रा
प्नोतिनञः प्रयोगान्नञर्थविशिष्टस्यानयनंभविष्यतिकेः पुनरसौनञर्थो। निवृत्तपदार्थकः
प्रत्यक्षराहृष्टस्यगौरादेर्दर्शनाद्रुष्टोपदेशाद्वापवेमब्राह्मणोपमित्यध्यवस्यतिततःपश्चा
द्रुपलभतेनायंब्राह्मणइतिनतोऽब्राह्मणोपमितिप्रयुंक्ते। आतश्चनहृष्टगुणादर्शनाद्रु
ष्टोपदेशाद्वाब्राह्मणात्वाध्यवसायपर्वकमेवनायंब्राह्मणइतिज्ञानेनस्वपंकासवर्णोमापुरुषः

मु॰ सा॰
१०८

हृष्ट्याध्यवस्य निर्व्वाहकरणोपपत्तिनियम्याश्रितं वस्तुतत्त्वं नस्य निर्णीतं भवतीति वःसूत्रभाष्यपप्र॰
लोचनपाके प्रयोक्तार्थस्यैव साधुत्वे सम्पन्नेन तथापि तन्त्राप्यस्य भेदप्रसक्से कचित्प्रयोगप्रानुपलब्धे
हेतुत्वत्वप्रदर्शनपरन्तु पूर्वोपपत्तेर्नञ्जन्यारोपवाचकत्वे नञ्पदं भक्त्या भावान्तरान्यथासं
मासदृशे उक्तयुक्त्यानरणोपासंभवेन नञ्नञ्जस्तद्वयेषक्त्वासंभवात् घटः पटघटः पटस्तना
पत्तेः प्रतियोगिभाषान्वयेऽनुपयोग इत्याविनितंत्रिकैवकेनीं लोघटस्सादैनातादात्म्येन घटो शेनी
सपदार्थभानात्तज्जसमभिव्याहारे तादात्म्यसंवंधावच्छिन्नीत्याभावबोधस्य सर्वानुभवसि
द्धत्वान्नञोभावार्थकत्वं विनानुपपत्तेनेदं रजतमिदं रजतमिति वाक्यजन्यबोधयोरस्ततद्भावा
तंवगाहित्वपापरस्परप्रतिवध्यप्रतिबंधकभावानापत्तेश्च नञोभेदार्थकत्वमावश्यकं।नचतन
ञोभेदार्थकत्वे ब्राह्मणमानयेत्यादितो ब्राह्मणाभिन्नसोपादेरपिबोधापत्तिः नचेष्टापत्ति
नब्राह्मणमानयेत्युक्ते सोपुमानीयकृतीभवतीति भाष्यविरोधादिति वाच्यं।घटत्वेन

क्ष घटपदात्सन्निहितव्यक्तिबोधवत्समकरणादिना ब्राह्मणाभिन्नमात्रार्थकाब्राह्मणपदात्सा दे
पादेरेवबोधसंभवात् न तस्य घटोऽनपटस्सावसमस्तेनतोभेदस्यवाक्तिभेदस्सुसासंशोपाधि
पानस्य शक्यतावच्छेदकत्वेसाघवात्।समासघटकस्य नञ्समनंतरपदस्यत।न्ने समासगणायां
तत्रस्त्वप्येत्याह कृत्वमेवः नवनब्राह्मणैरेते पुरुन मिस्यादौनञोभेदार्थकत्वे नस्य निपोगपत्तुपो
गिघटकपदयोः समानविभक्तिकत्वानुपपत्तिः सामानाधिकरण्याभावादितिवाच्यं।प्रति
योग्यनुयोगिनोरभेदान्वयबोधोपयिकाकांक्षापांसस्यामेवनञोभेदबोधनेनतयोः समान
विभक्तित्वस्य तद्रूपनीयत्वात् एवं च नञोभेदबोधेप्रतियोग्यनुयोगिवाचकपदयोः समानवि
भक्तित्व न त्वे निपामकमतएवभूतलेन घटइत्यादौ नभेदबोधः हृष्यते च यजतिषुयेयजामहं
हंकरोतीनानुयाजेष्वित्यत्रनञापर्युदासबोधः उक्तवाक्ये यजतिशब्दो यागस्वरूपवचनः तत्प
चानुयाजभिन्नेषु योगेषु येयजामहशब्दवत्मन्नं करोतीत्युक्ता रपीनेत्यर्थेः न्मतस्वान्चानुयाज भिन्न

भः सा॰
१०८ षुयजतिषुयेयजामहेषट्वन्मंत्रप्रयोगनैपेक्षार्थविधानादेधात्वादेरुविधेयार्थपेक्षत्वनपेक्षवा
त्वमुपपद्यते॥ अनन्यथापागेषुयेयजामहेषट्वन्मंत्रविधानमनुयाजेषुनिषेधविधानमिति
धेयद्वयार्थकत्वनप्रवावसभेशप नैर्ययजामहप्रसमुषंगकल्पनेगोरवाच्चेतिभावः अन्येतुशास्त्र
विहितप्रतिषिद्धत्वात्षोडशिग्रहणाग्रहणीवद्विकल्पापत्तेर्नानुयाजेष्विस्यजः प्रतिषेधार्थकत्वं
तथाहि क्रियायाः कारकसाकांक्षत्वात्तद्विनिगमनाविरहेणसकलकारकविशिष्टांप्रतिपाद्यभवनांभा
वनामुद्दिश्याभावविधिस्तत्रवाच्यः एवंचोद्देश्यस्यप्रसिद्ध्यर्थंतत्प्राप्तिरपेक्षिताप्राप्तिसापेक्षत्वान्नि
षेधस्यप्राप्तिश्चक्वचिद्रागतोयथानकलंजंभक्षयेदितितत्रकलंजभक्षणादेरागतदृष्टसाधन
त्वावगत्याप्रसक्त्यापाः कलंजभक्षणाभावनापानिषेधशास्त्रेणनिवृत्तिविषयत्वेऽवगतेऽर्थान्नि
षेधकलंजभक्षणस्यानिष्टसाधनत्वावाप्तिपातनतोनिवृत्तिः प्रकृतेतुयेयजामहंकरोतीतिशास्त्र
वसात् एवंचनिषेधस्यशास्त्रविषयत्वेनप्राबल्यवद्विधिशास्त्रस्याप्युपजीव्यत्वेनप्राबल्या

धेनविधेरस्यंनबाधायोगाद्विकल्पएवप्राप्नोति। विकल्पेचव्रीहिभिर्जुहोतिपवैर्वाजुहोतीत्यादे
यमंत्रोत्स्वनुष्ठानेवेदस्यविप्लुर्योसमितिजनकत्वासंभवाद्ध्रुवशास्त्रस्याप्राप्राप्ताभारापरवीका
प्रतीतप्रामाराप्यपरित्यागश्चेतिदोषद्वयं। प्रयोगांतरेयवोपादानेयवशास्त्रस्यस्वीकृतामाम
राप्यपरित्यागः परित्यक्तप्रामाराप्योपादानंचेतिदोषद्वयमितिचत्वारोदोषाः पुनस्तत्रैपप्रयोगे
व्रीरवुपादानेव्रीहिशास्त्रस्वीकृताशमाराप्यपरित्यागस्त्यक्तप्रामाराप्यस्वीकारश्चेतिदोषद्वयप्राप्त
तुर्येयवोपादानेव्रीहिशास्त्रस्यास्वीकृताप्रामाराप्यस्वीकारः स्वीकृतप्रामाराप्यत्यागश्चेति
दोषद्वयमितिचत्वारोऽन्येपीत्यष्टदोषविकल्पापत्त्यानुयाजपक्षाभ्याम्नुयाजभेदोवोध्यते सं
पंपत्त्युंदासः अस्मिंश्चपक्षेयेयजामहेनकर्तव्यनपाप्रतीयते।यजतिषुयेयजामहंकरोतीत्य
नेनैवतद्विधानान्नकिंतुसामान्यशास्त्रविहितयेयजामहमन्त्रस्यानुयाजव्यतिरिक्तविषय
वोध्यनेन तथाचसामान्यशास्त्रविशेषविधिसापेक्षत्वान्नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्त

भ: सा:
११०

ष्ट्रपसमर्पणादनुयाजेष्विति विकल्पविषयजामहः कर्तव्यत्वप्राप्तौ पतेः अनुयाजेषु न कर्तव्यमप
सोनापि प्रतिषिद्धः सइतिन विकल्पः न च नञा निषेधबोधनेपि पदशास्त्रेणाहवनीयशास्त्र
स्येवनानुयाजेष्विति विशेषशास्त्रेण यजतिषु येयजामहं करोतीति सामान्यशास्त्रस्य बाधान्न
विकल्प इति वाच्यं परस्परानिरपेक्षयोर्हि बाध्यबाधकभावः पदशास्त्रेणाहवनीयशास्त्र
स्यानपेक्षणात्तदुक्तिः निषेधशास्त्रस्य तु प्रतियोगिप्रसिद्ध्यर्थमपेक्षा विध्यपेक्षा प्र
सक्तं हि प्रतिषिध्यत इति न्यायात् तेन न ह्यबाधासंभवः किंतु क्लृप्तत्वाद्विकल्पस्यैवान्यपाच्छिर
हृष्टत्वेनाप्रसंगोपि विधेरेवं ज्ञापनेप्रदेनुयाजेषु येयजामहकरणेन कर्मणोपकारो भ
वति निषेधाश्च तदकरणादन्नतवदनाकरणादिवदर्शपूर्णमासयोः सचोपकारो दृष्टन
प्रवेश्यतोपि विकल्पो न पुरुषापराधः अत्र केचित् निषेधशास्त्रानालोचने सामान्यशास्त्र
लोचनमात्रेणाभ्यमात्मकप्रतियोगिप्रसिद्ध्या भावबोधनसंभवेन विकल्पप्रसक्तेः वि

निषेधसामान्यविधेस्तदितरपरत्वस्य ब्राह्मणेभ्यो दधिदानवाक्ये कौण्डिन्यापनदानत्वमित्यादे
स्तत्सिद्धत्वाच्च न च तत्रापि पर्युदासस्यैव नञा बोधनेन नञा पर्युदासबोधने विशिष्य विशेष
णयाश्च पदयोः समानविभक्तिकत्वस्यैव तयोः समानवचनत्वस्यापि तत्र तत्पातस्य प्रकृतेऽभा
वात् अन्यथा न महतो राजन्रसादस्य विवनमहतां राजन्रसादावपि महत्पदस्य प्रतीत्यापत्तेः तक्रेण द्वा
वितिवत्कपेत्रिसमर्पनेपि द्वितीयस्य दानव्यमित्यस्यानेरर्थस्य प्रसंगश्च ब्राह्मणेभ्यो दधिदान
वाक्ये कौण्डिन्याय नेसावतनस्यवाक्ये कौण्डिन्यभिन्नब्राह्मणोद्देश्यकदधिदानबोधसंभवादित्याहुः विकल्पप्रस
क्तिरपदेशाभावेपि वाक्यभेदाय ने जांगनकल्पनपासमानविभक्तिकत्वादेस्तद्बोधनियामकस्यासत्वेन
वनञः पर्युदासार्थकत्वमेवनानुयाजेष्वित्यत्रापि चिन्त्यमिति तु परे प्रकृतमनुसरामः अन्यथेति
लाघवानादरेणाधिपि नत्वस्य नञ आख्यातान्वयोपगमेऽपर्यसु स्वादृश्यादेरिसादिमापत्तिव्यमा
णात्प्रसादेः संग्रहः अत एव ब्राह्मणातिरिक्तस्वादेरब्राह्मण सदृशः पापाभावोऽन्यभिन्नोऽसोदसगव

भ॰ सा॰
११२

पोगितपोत्तरपदार्थान्वये ऽघटत्वोधायत्ताद्रूप्येण घटबुद्धिप्रतिबंधकत्वानापत्तेरत आह मते इ
शेष्यो वेति विशेषणाकांक्षा पामाह सारेपतियोगिनीति। उत्तरपदार्थे न प्रतियोगिनीत्यर्थः निरू
पितत्वं ससम्यर्थः उत्तरपदार्थेन प्रतियोगिनिष्ठविशेषणतानिरूपितविशेष्यताश्रयो नञ
र्थेनञर्थ इति पावत्। नञ्घुत्तरपदार्थप्राधान्ये पूर्वोक्तदूषणागणमुद्धरति हरोत आह। अयं
भाव इति गोणत्वेपीति॥ नञ्समासघटकेनत्दार्थस्य नञर्थे विशेषणत्वेपीत्यर्थः ज्ञापका
दिति। नञ्सूत्रस्य नञ्समासग्रहणज्ञापकादित्यर्थः। ज्ञापकतामेव प्रपंचयति। असः शिवइति।
एतत्तदोरित्यत्र नपरस्य ग्रहणं वर्ण्या सर्वनाम्नेतन्नञ्पूर्वस्य सोर्हल्लिलोपो विधीयते। नत्वेतस्मु
रूपांतर्गतेन तदोरूपसत्वे नतया सर्वनामत्वाभावादेवान नित्यप्रसंगव्यर्थं सद नञ्समासग्रहणं
नञ्समासे गुणीभूतार्थस्यापि सर्वादेः सर्वनामताज्ञापनेन चरितार्थमिति भावः। साहचर्यं ज्ञाप
कत्वस्यासार्वत्रिकत्वं सूचयन्नन्ने सर्वतान्मोरेवग्रहणमानांतरमाह अकोरिति। असर्वे

त्यः सर्वनामविहिताकजसंभवेन तत्पर्युदासात्सर्वनाम्नोरेव तपोर्ग्रहणं निश्चीयत इत्यर्थः। एतत्तद्भ्य
एतद्तरस्य सोर्हल्लिलोपइतिसूत्रार्थः। अर्थद्वारकसंबंधाश्रयणेन व्याख्यानं तु पूर्वकल्पाभिप्रायेणेत
पदलक्षणाभिप्रायेण वेति भावः विशेष्यानुरोधादिति। असतीति विशेषानुशासनेविशेषणवाचक
पदस्य विशेष्यवाचकपदसमानवचनत्वनियमादिति भावः ननु विशेषणस्य विशेष्यसंख्या विरु
द्धसंख्यावत्वेपि विशेषणवाचकपदान द्वचनमित्यत्र प्रमाणाभावेत आह किं चेति। ननु नेकश
ब्दोपादानादेव द्रूपोवं हुनो वा न सिद्धः प्रकृत्यर्थाह तिसंख्यार्थकजात्यभिप्रायकैकवचनस्याभि
र्थकमेवस्यत आह। औत्सर्गिकं चेति। एकवचनमुत्सर्गतः करिष्यते इति न केवलेति नियमत्वकव
चनविहितमित्यर्थः सतिनात्पर्ये ऽकवचित्सार्थकमप्येकवचनमिष्यत एवेत्याह। प्रेकमिति। एकभिन्न
त्वेनेप्रस्थितासु पोषासु प्रत्येकं सवचनान्वयबोधायेत्यर्थः उपसंहरति। नत्विति॥ अत्र एवेति। अत्रैवेक
दृष्टेकभिन्नार्थकत्वदेवेत्यर्थः सुपपाद्मिति भेदप्रतियोग्येकार्थकत्वेन द्रूपपादस्यादेकशेषेणस

भ.सा.
११३

र्थेनंत्वगतिकगंतिभाष्योदाहृतेनेकस्तिष्ठतीतिप्रयोगेनञर्थस्य आहार्य्यं। प्रत्येकं स्थितस्य त्वपबोधा
त्वनन्वैकवचनं। अनेकोजनाइतित्वसाध्वेव। उत्तरपदार्थप्राधान्यादिप्रपदेशस्तुप्रायिकइतिभा
वस्तुतस्तु। उत्तसमासग्रहणं पूर्वपदार्थप्राधान्येपि सर्वादीनां नञ्समास उत्तरपदार्थप्राधान्यम
युक्तकार्य्यसामान्यताप्रकमिष्टानुरोधित्वात्सामान्यापेक्षतापरतापारस्तेनानेकमित्यादौनेकवचना
नुपपत्तिः अत्वंभवसीत्यादिनाहंभवामीत्यादिर्गृह्यते। युष्मदस्मत्समरोप्युपलक्षणं। एवंच मिट्ठैव
सत्रापि लक्षणं तितुनैयायिकाद्यनुसारेण। अत्वंभवसीत्यादावारोपादिना धर्मसत्त्वानुभवविरु
द्धत्वान्नमाससर्वेनोत्तरपदस्यस्वार्थभिन्नसाकल्यमेवयुक्तमितिभावः प्रसज्यप्रतिषेधार्थकन
ञोव्यवस्थामाह। एवंनपचसीत्यादि। नञर्थपुरुषान्वयेतु मध्यमेपुरुषव्यवस्थानुसिद्धेति सर्वापि
तुंपचसीतिमध्यमपुरुषनिर्देशः अधिकंत्वाकरवेवोक्तं। अभावविशेष्यकबोधहेतुमाह। असम
स्तेति व्याख्यातापेः नञः नञर्थस्य प्रसज्यप्रतिषेधस्य। तादृशनञर्थाभावनिष्ठविशेष्यतानिरूपित

प्रकारतासंबंधेनबोधेधात्वर्थजन्योपस्थितेर्भावनात्वावच्छिन्नविशेष्यतासंबंधेनहेतुत्वस्यपूर्वमु
क्तत्वादितिभावः। अभावस्यकेनरूपेणशाब्दता। नत्वाविद्यमावत्वेन। चैत्रोनपचतीत्यादावपिभेद
बोधापत्ते। प्रसज्यप्रतिषेधत्वेनशक्यत्वेपिसखण्डोपाधेः भेदस्यापियोग्यानुपलब्धिजन्यप्रत्यक्षविषयत्वा
त्तदनुपस्थिताबाधेनतोभावबोधाङ्गत्वस्यतत्त्वाहसत्वेति। अभावत्वस्यत्वरूपः तथाचनञोन्योन्याभा
वत्वेनास्तितत्संसर्गाभावेशक्तिकल्पनान्नदोषः अनेनस्वप्रतियोगिनिष्ठाभावप्रतियोगित्वमति
क्रान्तास्तत्संसर्गाभावम्भावत्वेनिविम्रहः नतच्छाभावत्वत्वस्वप्रतियोगितिष्ठस्वसदृशाभावप्रतियोगि
त्वव्यभिचारित्वेभावकृत्वमितियावत्। अन्तोजघन्येचरमेमित्यमरेणांस्यशब्दस्यजघन्येहृतिबोधना
ज्जघन्यत्वंचोक्तार्थस्यजघन्येपहृतिबोध्यत्वात्। घटात्यंताभावस्यस्वप्रतियोगिनिष्ठात्यंताभावप्र
तियोगित्वाभाववत्त्वनिघटहत्तिधर्मेस्वस्यानत्वेनअत्यन्तंघटान्योन्याभावस्यतुस्वप्रतियोगिनिष्ठ
भावप्रतियोगित्वव्यापकत्वान्नद्वावृत्तिः अस्तुसतिप्रदर्शनंचेदं। लक्षणंत्वत्यन्ताभावस्यतादात्म्ये

म॰ सा॰ रसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं। अन्योन्याभावेति॥ अन्योन्यस्मिंस्तादात्म्येनाभावो भा
११७ भवतमितित्यत्स्या तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वं तत्राप्याशङ्क
इत्यर्थः वस्तुन स्वस्वंताभावस्याभावत्वेनैव शक्यतानन्तरं नगरपेगगोरवात्तेनतरेपागावोधस्यान
नुभवात्॥ अन्तरत्वत्तादृशयमभावस्यैतस्याभावत्वेनैवा स्वेनाभावोपादानं। तच्च न जडः सं
योगादिसंबंधावच्छिन्नप्रतियोगिताकाभावत्वादिनाभावे शक्तत्वानभ्युपगममतत्वेन घटस्त
तिवाक्यजबोधस्य संयोगसंबंधेनभूतलविशेष्यकघटविशिष्टबुद्धिविरोधित्वानापत्तिस्तत्सं
सर्गावच्छिन्नत्वद्विशिष्टबुद्धौ अभावांशे तत्संसर्गावच्छिन्नप्रतियोगिताकत्वावगाहित्वात्स
वत्तरभावबुद्धेः प्रतिबंधकत्वादितिवाच्यं। निरुक्ताभावत्वेन शक्तावपि संयोगादीनां संसर्गो
तादात्म्येनतरसंबंधत्वेनानुगततत्वेनोपनिवेशतीप्रतपानअद्दशतत्ताप्य भावेविशिष्यसंयोगा
वच्छिन्नप्रतियोगिताकत्वभानासंभवात् प्रतिबंधकत्वानुपपत्तितादृवस्यातत्तादृशविशि

ष्टबुद्धिविरोधित्वानुरोधेनोकांक्षावशाद्देवतादृशप्रतियोगिताकत्वस्यविशिष्यप्रतियोग्यभावयोः
संबंधविशेषयोर्भानस्योपगंतव्यत्वात्। नन्वन्योन्याभावसाधारणाभावत्वस्य नञ्पदप्रवृत्तिनि
धान्विर्वृत्तिः संख्याविशेषाणामिति। एकत्त्वाद्यवच्छिन्नानामित्यर्थः। अविभागेनाभेदेन अविरो १३

धेनेति पावत् उक्तार्थे हरिवाक्यं प्रमाणयति। उक्तं चेति आहितशात्कपः आहिनासमर्पितानत्त्र दोषवि
भेदनिबंधनाविरोधत्रपाशक्तिर्येरित्यर्थः स्वरूपविरोधादिति पावत्। अतएवः अविभागेनः अवि
रोधेनेत्यर्थः तां अभेदैकत्वसंख्यांनाहृत्य। मधुनिष्ठरसस्यैतितुल्यामित्यर्थः। नन्वेकत्वद्वित्वादी
नांमेकत्रसत्त्वमनुपपन्नं। न हि द्वावेकत्वेनव्यवहिप्रतेनाप्येकोद्वाविति। न हि द्विपुत्र इति भाष्यात्
किंच दृष्टांतोपिन समंजसः तत्र रसवद्रारवेऽवपवि निमास्विके रवपवसजातीपरसांतरस्पैयोस्या
नाभ्युपगमादत आह परिस्पत्केति वा शब्दः पक्षांतरे। अग्रहीतविशेषधर्मकं संख्यामात्रमित्यर्थः।
परमेकस्य। उक्तास्वरसाभिसंधिः कथाधस्पदीयं तस्सेपिप्रमाणत्वेनोपन्यस्यतिभेदानामिति। भे
दानामेकत्वद्वित्वादिविषधर्माणां परित्यागादग्रहणान्नरसंज्ञाव्यापारपर्ये भेदेनान्वयि। संख्या
मासंख्यास्वरूपः सः एकत्वादिः तथाविधः अभेदैकत्वव्यपदेशपरस्परार्थः तदेव विशदयति जा
तिभागस्येति एकत्वत्वादेरित्यर्थः भेदापोहेनेति। भेदस्य विशेषस्यापोहोऽग्रहस्तेनेत्यर्थः यद्वा भेदा

भस्रा:
१४०

पोहेनेत्यस्यव्यापाराद्वित्वेनान्वयः महूसादिशब्दलीपान पाचैकत्वदेर्जातिविशेषस्यभेग्महन्पोपो
स्यव्यापारोविशेषरागत्मानतोवर्तेनद्रसर्पैः भेदापोहेनवर्तेनेतेः निघमेनद्दतिचापाठेतुभेदनपोपो
ऽपोहोतन्नाद्यमतत्वंसनवर्तेनेतेन भासनद्दत्यर्थोवसेपः पघांतरावसोवृत्नेनेनस्पाठस्येवह रिसंमत
त्वमध्यवसीयते हित्वबाघग्रहकालिकसंख्यात्वप्रकारकप्रतीतिगोचरः संख्यापदार्थोऽभेदे
कत्वपदव्यपदेश्योभवतीति समुदितार्थः तत्रहघांतमाहाग्रहीनविशेषेणेतिस्थूलकत्वादिप्रकारक
ग्रहासमानकालिकनूपत्वप्रकारकप्रतीतिविषयेणस्थूलकादिनैवपपाघटादीनप्रवाप्तिनिमृतोप
नेस्थूलकादिपोभेदनपोऽपोहः स्थूलत्वादिरनद्याह्यनिरूपः सतुनमनोपनेनह्लस्यपुरुषइत्यादौराजा
[illegible]र्थः संख्यावानितिप्रतीपतेनचसंख्यांशेएकत्वत्वादिभासनइत्यर्थः नादशासंख्याभान
स्यपरानस्पपेतवात्प्रसिद्धंस्यितिरनपृशेषपरणेनव्याघचे वैयाकरणानामिति ननुनाद्द राम
शसंख्यायाहेतोभानंकिंप्रमाणमतआहायंभावइतिसामान्यतानयर्विकेनानद्वुतुकेत्यर्थः॥ १४०

अघटपकी ति। तांविनोक्तजिज्ञास्यापाप्त्रसंभवादितिभावः साचसंख्यापर्वोत्तरपदार्थपूाः सर्वंधवहु
त्रिशांशैव। अजहन्नवार्थोहतिपक्षेपर्वपदस्यसंख्याविशेषवाचकत्वेगमकाभावैः नेनद्वित्वोमा
हिकोभासजातस्पावकीभावहिरामवसरेस्याद्वोहनावभेदेकत्वसंख्यापाप्त्रभानेपिनक्षतिः।
अतएवसंख्याविशेषस्पैवपर्वपदार्थत्वानद्वितीयएकमुहस्यस्कपकरणायोग्यत्वाद्दइत्वावगतिः
त्तीपविशिष्टकालावगमापमासषट्पपोगसंख्याध्यवसायः चतुर्थेनवकीवादेशणदेकत्वावग
तिः पंचमेप्रकरणादित्वावगतिः एवंकारकमध्यइत्पादावप्यत्रमेकस्यमध्यासंभवानुपसतिम
करणोराजपुरुषइत्यादावपिसंख्याविशेषप्रकारेणैवभानं तिदानत्रापिनतस्यवसपर्वमिति
भेदाभेदसहितद्वित्वादिसंख्यातदभावसहितमेकत्वमभेदेकत्वमितिव्युत्पत्त्यासंख्याचैनेक
त्वमेवोपसर्जनपदार्थभासनेनएवकवचनमुत्सर्गतः कृरिघ्यतइतिवचनाद्राजत्वस्यपुरुषस्
इत्यलौकिकविग्रहएकवचनंप्रयुज्यते पत्रतुप्रकरणादिनासंख्याविशेषभानंतत्रबहुवचनम

मु॰सा
१४१

पि पद्यान्वित्र गुरिसाद्दोचित्राश्वस्तगोष्ठसिसभिभिस्योनरयं यमवनारयति। तस्याद्रतीत्वनिघट क
पदार्थोपसर्जनत्वमेके। तस्य पक्षे प्रतीतावित्ति। संख्यात्वावच्छिन्नैकत्वप्रकारतानिरूपितविशेष्यत्वेन
बोधहृत्यर्थ्यं उपसर्जनपदार्थे संख्यात्वेनैकत्वमेव समीयते न द्वित्वादीत्यत्र दृष्टान्तमाह नियावतः
गणानापामिति त्रित्वविशिष्टानेकसंख्यानेकत्यपर्यः कपिंजलानालभेनेतिवाक्येन त्रुटत्वव्याप्य
संख्याविशिष्टकपिंजलालंभनं विधीयते। तत्र त्वपाणां चतुरादीनां वा ४६ संभवतीति संशये त्रु
त्वव्याप्यत्वस्य त्रित्वादिषु सर्वेष्वप्यविशिष्टत्वाघुणास्य मेवात्मघाव्यमिति पूर्वपक्षे चतुरादीना
मालंभने मा हिंस्यादिति सामान्यशास्त्रविहितनिषिद्धनिषेधस्यासंभवतावच्छकीतरपरत्वरूप
तात्पर्य्यसंकोचकल्पने गौरवाद्दशानायां प्रथमोपस्थितत्रित्वपरत्वनिषेधस्यासंभवतावच्छकी
तरपरत्वरूपतात्पर्य्यसंकोचकल्पने गौरवाद्दशानायां प्रथमोपस्थितत्रित्वपरतयापि वद्धवच १४१
मस्यचारितार्थ्योदर्शो घवाद्बहुत्वव्याप्यत्वेनान्त्रित्वमेव बहुवचनार्थ इति सिद्धांतितं तत्र्यापाद

चापि संख्यात्वेनैकत्वस्यैव बहुपर्यत्वनन्तु द्वित्वादीनामप्रतीयमानविशेषधर्मकैकत्वमभेदेक
त्वमिति व्युत्पत्तेरिति भावः। जिज्ञासायामित्यादिनिर्देशेरस्मिन्व्याकरणे व्या। सिन्यापक्षेवाश्र
यत्नेन प्रहृते संख्यात्वेनैकत्वप्रतीतिर्द्रूपपादेऽप्यपि चेन्नः ननु जिज्ञासापांशाद्धमेव सामान्यध
र्मप्रकारकज्ञानमपेक्षितमिति न नियमः आम्रादिफलदर्शनेनापि तदास्वादनेच्छादनेच्छायाउ
त्पत्याव्यभिचारात् नन्वेवं सामान्यधर्मप्रकारकज्ञानस्य हेतुत्वं वियीयते तिवाच्यं आम्रदर्शन
स्याहृदोधकतयात इस स्मरणेन तदूपपत्तेः यत्नेन तस्याम्रशक्यत्वेपि नद्यभिचरितद्रव्यत्वेना
नुमानिकतद्बोधसंभवान्न तादृशजिज्ञासायामननुभवान्नुनोक्तयुक्तिदेनेरभेदेकत्वसंख्यापर्य
कत्वसाधिकेत्यभिप्रेत्याह। वस्तुतस्तु जिज्ञासैवेति। राजपुरुषइत्यादौ पूर्वपदार्थे एकत्वद्वि
त्वादिप्रकारकजिज्ञासैवेत्यपर्यः अननुभवसिद्धेति। अस्पष्टयेनन तदनुरोधेन सामान्यधर्मप्रकारकज्ञा
नस्यावश्यकतास्यादिति शेषः अभेदैकत्वसंख्यायामिति भाननिमित्तं तु प्रातीनगायानुवाद

भ॰सा॰ एवेति भावः अनुभवासिद्धत्वस्य शपथनिर्णेयत्वं मत्वाह तथात्वेवेति अनुभवसिद्धत्वे चेत्स
१४२ र्थः समानप्रकारकत्वेनैवेति। एवकारेण विभिन्नप्रकारकत्वव्यवच्छेदः तद्धर्मप्रकारकेच्छां प्रति
तद्धर्मप्रकारकज्ञानस्य हेतुतायाः सुखादीच्छास्थले क्लृप्तत्वात्प्रकृते विशेषधर्मप्रकारकजि
ज्ञासायाः सविषयविषयकत्वेन ज्ञानप्रकारीभूतविशेषधर्मप्रकारकत्वस्यावश्यकत्वेन तत्त
द्धर्मविशेषधर्मप्रकारकज्ञानकार्य्यतावच्छेदकाक्रान्तत्वादिति भावः ननु रूपेणावेति। एकत्वत्वा
दिविशेषधर्मेणैवेत्यर्थः एवकारेण संख्यासामान्यधर्मव्यवच्छेदः इष्टापत्तिरस्तु नः तथा सति
द्यादेव विशेषधर्मोपस्थितौ तत्र जिज्ञासानुदयप्रसंगादिति भावः अत्रेदं चिन्त्यं ज्ञानेच्छयोः कार्य्य
कारणभावे समानप्रकारकत्वस्य तन्त्रत्वेपि सामान्यधर्मज्ञानस्य सर्वसिद्धविशेषधर्मप्रकारक
जिज्ञासाजनकत्वानुरोधात्तद्धर्मप्रकारकज्ञानस्य कार्य्यतावच्छेदककोटौ तद्धर्मप्रकारकत्वांशेसा राम
तन्त्र्येणैव निवेशनीयमेवं च जिज्ञासाया ज्ञाभेपारतन्त्र्येण तद्धर्मप्रकारकतयोत्पत्तिस्तत्कार्य्यता १४२

वच्छेदकानाक्रान्तत्वान्न तत्र व्यभिचारः तादृशजिज्ञासां प्रति अन्वयव्यतिरेकाभ्यां सामान्यधर्म
प्रकारकज्ञानं हेतुः यद्वा सामान्यधर्मप्रकारकज्ञानं विशेषधर्मप्रकारकज्ञानद्वारा विशेषधर्मप्र
कारकजिज्ञासाप्रयोजकमस्तु यत्र सामान्यं न च विशेषधर्मत्वावच्छिन्नमिति नियमाद्धि गवि
षया सामान्यविशेषधर्मसंप्रकारकजिज्ञासाप्रयोजकमस्तु यत्र साक्षाद्बोधकविषयता सामा
न्यज्ञानाद्विशेषधर्मत्वेन विशेषधर्मस्य सामान्यविशेषयोः साहचर्येण तत्तद्धर्मांशे मोषवशाद्वा
धकविधया वा सामान्यज्ञानाद्विशेषधर्मस्येन विशेषधर्मस्यासिद्धत्वान्न तद्द्वेषेण असिद्धत्वाच्च न
द्धर्मप्रकारकज्ञानकार्य्यतावच्छेदककोटौ स्वातन्त्र्यानिवेशेपि न विशेषधर्मप्रकारकजिज्ञासा
नुपपत्तिः धर्म्यभेदेप्येकस्मिन्नेकस्यासिद्धत्वासिद्धत्वासिद्धत्वयोर्निच पक्षभेदेन पागासैरिष्टत्वात्
यमन्यथा सामान्यधर्मप्रकारकनिरूपणानन्तरं विशेषधर्मप्रकारकनिरूपणं न प्रकृतासंगच्छेत।
अनाकांक्षिताभिधानेऽर्थान्तरता। आद्यनन्यथासिद्धप्रयोजकत्वाज्ञापने च कार्य्यकारणे वाज्ञाने किमस्य

कारणंकार्य्यंवेतिजिज्ञासेतिवदतादोषोनिरस्तः। प्रकृतेचसंख्यात्वव्याप्यसामान्यताज्ञानजन्यद्वित्वा
द्यविषयकविशेषधर्मत्वावच्छिन्नद्वित्वादिप्रकारकजिज्ञासानिरासार्थेतिनरूपपन्नपेऽभेदैकत्व
वृत्तेनिरावश्यिकाः एवंचाभेदैकत्वसंख्यायावृत्तौमानमिति। मत्स्यापियथाद्यानस्योपपत्तेरभे
दस्यतस्सहचरितद्वित्वादेरप्रतीतेर्निरस्तमावश्यकत्वर्थपरत्वपाख्याख्यानंनादेयम् आख्यातपदान्त
र्गतत्वेनतदर्थस्यमानपदार्थान्वयित्वासंभवाच्चेति। इतिभूषणसारदर्पणेऽभेदैकत्वसंख्या
निरूपणं। संख्याविवक्षाविवक्षानिरूपणेसंगतिंदर्शयति। प्रसंगादिति। अभेदैकत्वसंख्या
निरूपणेकपिंजलानालभेतेत्यत्रविधेयविशेषणतयात्रित्वसंख्याविवक्षापास्तत्वाद्
येज्ञानहेत्वाद्वेत्यर्थः। अविवक्षितमिति। नहिवृक्षणोपपत्तिपथावस्याशरणांमार्जनालाभइति
भावः। धात्वोरितीति। मत्स्यविधेयधात्वोरित्यत्रस्थधात्वनुपदार्थविशेषणीभूतकत्वादेरतन्त्रा राम
त्वविवक्षणादित्यर्थः। अत्रसख्यासूत्रउद्देश्यगतविशेषणस्याविवक्षामीमांसकानामपिसंमतेत्या १४३

ह। उद्देश्येतेतिविशेष्येनेतितत्समत्यपार्थः। सर्वैर्धात्वर्थैर्विशेष्येनेत्यर्थः। ननुनेयंयुक्तिर्विवक्षासाधि
कातादृशसमुदायस्यैकपावचनत्वाभावेनततःप्रत्ययोत्पत्तेर्गगनकुसुमायमानत्वेनस्वतन्त्र
वादिवक्षासत्वादतआहव्याहृत्याद्यधातुकस्यैवहृत्वादेरितीतिविवक्षितत्वाच्चेति। अन्यथातद्रूपाश्र
नवैयर्थ्यापत्तेरितिभावः। एवमिति। अनुवाद्यविशेषणमविवक्षितमेवेतिनियमवदित्यर्थः।
पशुनायजेतेत्यत्रचयजत्यर्थयागस्यकरणाकांक्षायांसाधनत्वेनपशुर्विधीयते। एवंचपशुश्र
स्यविधेयसमर्पकत्वात्तद्गतस्यनानाकेषांचिद्ग्रहणेकेषांचित्परित्यागेमानाभावेनपशुत्व
पुंस्त्वादिवदेकत्वमपियागसाधनत्वेनविवक्षितं तेननानेकपशुकरणकयागादृष्टसिद्धिरिव
मत्वापिविधेयविशेषणंविवक्षितमविवक्षाकारणाविरहादितिमीमांसकपरिशीलितानासरेशता
त्वदनुसरणानियमोनास्माकमित्यर्थः। एतन्नच्छाल्लिनदाभ्युपगमनिष्टंप्रदर्शयतिस्त्राम्याभिति। वि
धानानापत्तेरिति। नचैकवचनोपस्थितैकत्वस्यापिविधेयविशेषणतयानद्विवक्षायांतक

भ॰सा॰ रद्वयविधानं न स्यादित्यर्थः ननु मास्तु तद्द्वयविधानमत आह न याचेति। द्वंद्वे चैकवाक्यतया वि
१४४ धानमभिप्रेत्य वाक्यभेदेन विधानपक्षे त्वाह। अग्राह्य णाइत्याशाविति। एकत्वविवक्षायामेव निर्विधेय
गुणगतैकत्वविवक्षापेक्षयेत्यर्थः तथा चैकग्रहणमेवोक्तं यत्तावदकमिति भावः ननु पश्वेकत्वादि
विवक्षा हि न तां जैमिनिसंमतत्वान्न तदाश्र पूरणस्यानाकत्वमित्याशंकामपाकरपनोत्तनाप्र
दर्शनमिषेणाकरपदार्थव्याचष्टे॥ शब्दार्थत्वसादिपश्वेकत्वाधिकरणोक्तदूषणाभिमिति। प
श्वनायजे। तेस्यत्र विधेयगतैकत्वस्याविवक्षणे पश्वनरालंभेप्रयोग प्राशुभावबाधेन याग
वैगुण्यापत्तिः गुणानुरोधेन यागावृत्तौ प्रधानत्वभंगापत्तिर्याचसंश्रुकरणाक यागासंभवश्चे
त्येवमादयो दोषा हेतवस्तेषामित्यर्थः सिद्धांतसिद्धमिति सिद्धांतप्रतिपादक महाभाष्यादि सि
द्धमित्यर्थः आदेशभेदवारणायेति। वस्तुतस्तु नैकग्रहणं विधेयगतत्वविशेषणाविवक्षायां तत्र राम
अतपोः पलपोःकरं कुर्वि साशाविवाद्गणाइत्याशवपिपर्वंयरपोरितिद्वंद्वनिर्देशेनैकवाक्यतये १४४

वोभयोःस्थाने एकविधानसंभवान्यायाभिभेदात्तातेको गुणाइत्येकग्रहणस्य भाष्ये प्रत्याख्याना
दिति रहस्यं। वाक्यभेदादिति। प्राजापत्यान्तचग्रहाद् निवाक्यविहितग्रहोद्देशेन संमार्गो विधीयते
ग्रहं संमार्ष्टीत्यनेनः नन्वास्तु वा ग्रहे कत्वविवक्षायामुत्पत्तिवाक्यगतसंख्यायां विरोधाद्वाक्यभे
भेदो विभिन्नविशेष्यकवाक्यजनकत्वेनदापत्त्यतेत्यर्थः अन्येतु ग्रहं संमार्ष्टीत्येकमित्याकारवाक्य
भेदापत्तिमाहुः आदिपदेनोत्पत्तिवाक्यगतत्ववृत्तसंख्यायां ग्रहपदार्थस्य परिच्छिन्नत्वात्परिच्छे
दकाकांक्षाभावस्य ग्रहमिति द्वितीययासंस्कार्यत्वस्मरणप्राधान्यबोधनात्प्रतिप्रधानं गुणावृ
त्तिरिति न्यायप्राप्तिनिगमना। विरहात्सो भावस्येत्तिरासपरस्तकसंमार्गस्य सर्वग्रहेष्वेकसुगादिवद्यथ
थ्यादि विशेषणानवक्लिप्तांगत्वोभावेनतदेकत्वस्य प्रयुक्ततिपावैकल्याप्रसक्तेः अत एव सावित्रं हवी
जस्यवसंग्रहः अतनाकरमितिपर्वदुन। इशगमादेरित्यादितोदीचामातःस्यानेपरूपवीयादनिवि
हितत्वसंग्रहः तत्रा॰ः॰ कारस्थानिकानमुद्दिश्यपत्ववि धानानां अनस्येवेत्सिषेध विधायकेकाजि

भूसा॰ नित्सत्वेचइत्येकत्वविवक्षादरेणानेकार्थोपदेशव्याहतिर्यथाद्विर्व्याख्यानात्।वस्तुतस्तुयद्येवंतत्त
१४५ दृष्टांतेनान्याप्युक्ताघविशेषणानांसंख्यादीनांक्वचिद्विवक्षास्तुनदिनरविशेषणानांविवक्षा
पंतनुनर्किविहायवंमीमांसायामनुवाद्यांशेजातिलिंगसंख्यानिरिक्तविशेषणस्यादर्शनानेषा
योस्तिवाक्यादेवागमेनानुषंगिकत्वाद्विवक्षायुक्तनेष्टहन्नेनुननचेतिवाच्यं।। इतिभूष
णसारदर्पणेसंख्याविवक्षादिनिर्णयः अवसरसंगतिंक्त्वाद्यर्थनिर्णयंदर्शयन्क्त्वाप्रत्ययपा
दिति प्रकृत्यर्थत्वस्यपक्षेपिसत्त्वादाह भावइति तत्रापिसत्वमनेव्यापारस्यवतत्पूर्वकालादिद्याविस्य
येःपाकइत्यादाविवपक्त्वापक्त्वेत्यादिजन्यबोधेभावांशेवैलक्षण्यस्यानानुभवादितिभावः ननुत
नुपक्त्वेत्यादिजन्यबोधेभावेलिंगसंख्यानन्वयित्वंनइनुभपनएवःएवंपक्तुमित्यादोपत्तायंकतु
मुनासाध्यत्वेननहोधाकुसुतमायमितिकागनिरिनाःनत्र पूर्वकालइत्याद्युपादानात्पूर्वकाला
दीनांवाच्यतामतोननेभावमात्रार्थकत्वेनुननद्दनुपपत्तिरितिभावःसमानकर्तृकत्वादीनांन

याचसमानकर्तृकयोर्धात्वर्थयोर्धात्वर्थयोर्मध्येपूर्वकालसंबंधीयोर्थस्तद्वाचकात्क्त्वेत्यर्थःपर्या
कंसायांकर्तृरिबद्धिस्सस्यसक्तौनहाधनांथेवार्जिकारंभेणाभावस्यैववाच्यतानिर्वोर्ध्यनोक्तनुः
प्रसयविशेषणत्वेतुसमानकर्तृत्वेनैवव्याप्तसन्निपातनानुपपत्तिःमेववर्तमानत्वादिवदिति
भावःननुनघोसनापामपियानामावःस्तत्रक्रिययोर्विशेष्यविशेषणभावस्यैवाभावादत
आह।अपंभाववर्तमानत्वादिवदितिभावःननुनघोसनापामपिपाइति।एकवाक्यनेनिःस
मानकर्तृकयोरित्यादिसमानाधिकरणसंबंधाधिकारीयत्वादितिभावः अनुपपत्तेरितिःविशेष्यवि
शेषणत्वयोःसंसर्गविषयतानिरूप्यत्वेनसंबंधंविनाविशिष्टबुद्धेरेवासंभवाभावेनैकवाक्यस
मप्युपपन्नमितिभावःअप्रमत्येति।विशेष्यविशेषणभावमंतरेणाप्येकवाक्यताभ्युपगमेइत्यर्थःसा
मानाधिकरणमितिएकाश्रयत्वमित्यर्थः पूर्वोत्तरभावःसोत्तरसमयोत्पत्तिकत्वंस्वपूर्वसमय
वृत्तित्वंवाव्याप्यत्वमव्यविनाभावित्वं।नुमुनाघनेशाब्दबोधमहिमाहानयानेति।भोजनजनिकेति।।

भ॰सा॰ जनकत्वस्यासंसर्गतेति सूरिभिरुक्तं मिश्र मुक्तिः बोधाकारस्तु भोजनविशिष्टस्यैव । जनकत्वस्यापदार्थेन
१४६ पादप्रकारत्वात् क्रियापदजन्यजनकभावस्यापि संबंधत्वे युक्तिमाह । अनन्वेति । जन्यत्वस्य संस
र्गसर्गत्वाभ्युपगमादेवस्यर्थः । जलपानानंतर्यस्य सेतस्तेनेन पूर्वान्तरभावसंबंधस्य बोध्यते तज्जन्यत्व
विवक्षायां तु प्रयोगः इष्टस्यैवेति भावः सामानाधिकरण्यस्य प्रकृतपुरुषाविनिगमनाविषयतया संस
र्गताभ्युपगमस्तु यत्र पूर्वापरीभावापन्नभोजनगमनक्रिययोश्चैकाधिकरण्यं तत्र भुक्त्वा ज
च्छतीति प्रयोगवारणाय । अव्यवहितोत्तरत्वस्य नुद्दिनानंतरितपूर्वकालत्वादि समानाधिकरणभो
जनादिक्रियामादाय प्रकारवारणाय अव्यवधानं च तादृश्यस्यैव शां दिनादिनादिनान्ताद्यंतातो भोजनानंतर
रंजनादिव्यवधानेऽपि तादृशप्रयोगानुपपत्तिरिति बोध्यं । ननु पूर्वान्तरभावस्य संबंधताभ्युपगमे
ध्ययनकालेऽधीत्य तिष्ठतीति प्रयोगानुपपत्तिः स्थितावध्ययनानंतर्याभावात् । एवं मुखं व्यादाय राम
स्वपितीति नस्याच्चांशं पुटविभागस्य व्यादानकालस्यैव स्वापादि सत्त्वेनादृशप्रयोगस्य इष्टत्वेनया १४६

दानस्य स्वापपूर्वत्वाभावात् तन्माह । अधीत्य तिष्ठतीत्यादि । कालविशेषेति विभिन्नकालिकयोः कालिक
संबंधघटितव्याप्यव्यापकभावाभावेन तत्संबंधावच्छिन्नव्याप्यत्वस्यासंसर्गतोपगंतव्यात् केवलं तत्र व्या
प्यत्वस्यैव संसर्गता किंतु सामानाधिकरण्यस्यापीत्याह सामानाधिकरण्यं चेति । नानाविभिन्नकर्तृ
केकालिकव्यापनादिमादाय नोक्तप्रयोगापत्तिरेवं च समानकर्तृकयोरिति सूत्रविहितक्त्वान्तस्य समा
नकर्तृकत्वं तु सामानाधिकरण्यसंसर्गस्य शाब्दबोधविषयता सार्वत्रिकी जन्यत्वादौ न तु तास्य
र्यंवशात् क्वाचित्की सेति भावः । अन्येन तु सामानाधिकरण्यस्यैव पूर्वान्तरभावस्यापि क्त्वान्तजबोधविष
यतासार्वत्रिकी । मुखं व्यादाय स्वपितीत्यादौ मुखं व्यादानस्य त्रैव व्यादानोत्तरमपि स्वापानुवृत्ते तत्
यापोर्वापर्यमादाय प्रयोगोपपत्तिः एवं चोक्तसंबंधद्वयातिरिक्तसंबंधमानस्यैव क्वाचित्कत्वमित्या
हुः तच्चावजानातीति मां पश्मादतस्तेन भविष्यतीति । मत्यसंनिमनाराधप्रजेतित्वा शाशापसेस्यनम
त्यसंनिमनाराध्यन मज्जन भविष्यतीत्यर्थादिभिन्नकर्तृकादपि क्त्वादर्शनात् समानकर्तृकत्वस्यापि

म:सा:
१४७

क्तांतजन्यबोधविषयता न सार्वत्रिकीति वाच्यं । सत्त्वखरसानादृत्यले स्थित्यादिक्रियाया आद्यसारा
ध्यस्थितस्येति बोधस्याभ्युपगमेन सार्वत्रिकत्वात् । अस्तेरिति । अस्यत्वस्यत्वादिति । आकांक्षानिय
म्यत्वाद्धात्वर्थानितत्प्रत्वाद्धेत्वर्थे क्रिययोः संसर्गः इति । प्रकृत्यर्थविशेषकत्वं प्रत्ययार्थस्यासंभवा
दिति भावः । अत एवेति । समानकर्तृकत्वादिद्योतकत्वादेवेत्यर्थः । भाष्यप्रतीकमिति । त्रयाणां समा
नभवति पूर्वं भुंक्ते पश्चाद्व्रजतीति । एवशब्देनोपात्तत्वान्नेति भाष्यं । तत्र समानकर्तृकत्वेन पूर्वका
लत्वेन च क्त्वाप्रापणे । ननु विषय इति । ननु प्रयोगप्रवृत्तकप्रसिद्धिविरहाद्बोधस्य इत्यर्थः । उक्ता अर्थोन्नाम
प्रयोग इति स्यापत्त्या । तथा च समानकर्तृकयोरिति निर्द्धारणे षष्ठी पूर्वकाल इति च षष्ठ्यर्थे वृत्त
ब्रीहिरिति कैयटाशयः । वाक्यार्थस्तु पूर्वमेवोक्तः । न च पूर्वकालस्य पूर्वादिशब्देनाभिधाने क्त्वोऽसा
धुत्वे पूर्वं भुक्त्वा पश्चाद्व्रजतीत्यत्र क्त्वोऽनुपपत्तिस्तदवस्थैवेति वाच्यं भाष्यकृतैव तत्समाधानात् । तथा
च भाष्ये नैतत्क्रियापौर्वकाल्यं किं तर्हि कर्तृपौर्वकाल्यमेतत् । पूर्वं ह्यसौ भुक्त्वान्येभ्यो व्रजिक्रियाप राम
१४

श्चाद्व्रजतीति । अन्ये त्वाहुः । भोक्तृभ्यः पूर्वं भुक्त्वा परेभ्यो गन्तृभ्यः पश्चाद्व्रजतीत्यर्थे साधनान्तरक्रियापे
क्षं पौर्वकाल्यमादाय विभाषाग्रहणे इति क्त्वः संभव इति तदाशयः । तन्न्याय्यं । पूर्वकाल इति कर्मधारयः
मत इति तु नोक्तं पूर्वपर्यायशब्दत्वात् । तेन तत्पर्यायबोधानुभवात् । न च यत्र समानकर्तृकयोरर्थयो
र्मध्ये पूर्वकालविशिष्टार्थवृत्तिधातोः क्त्वेति सूत्रार्थः । तथा च पूर्वकालः क्त्वर्थो धात्वर्थप्रकारश्च ।
अत एव समानकर्तृकत्वेन पूर्वं भुंक्ते पश्चाद्व्रजतीत्यत्र क्त्वाप्रसंगमाशंक्य एवशब्देनोपात्तत्वा
न्नेति परिहृतं भाष्ये पूर्वशब्दस्य पूर्वकालोऽर्थो न तु धात्वर्थस्तत्रवृत्तिरिति तदर्थोऽनन्तरपर्यायानाम
प्रयोग इति । अत एवेत्यस्य प्राग्लब्धस्यास्यते भात्तु मिमग्निमशंकासंगतिः । अन्यथा फलार्थक
तु सुतरां पूर्वकालत्वस्यासिद्धेर्यायोधानतानानुदसंगतिः स्यादेव । पूर्वकालत्वस्य तत्तात्पर्यतीतौ तु
कर्तृक्त्वाप्रापणे । वा सत्त्वप्रत्ययेन लदासाधितमिसन्ना । एवं च षष्ठ्याः संबंधवाचकत्ववदमी
षामपि संबंधवाचकत्वं सुवचमित्याहुः । व्यत्ययं दर्शयति । ननु धात्वन्तरार्थेति किं साघवे आस्यते भो

भ.सा.: कुमित्यमिमशंकानुपपन्नेः एवं भक्तत्वेनोपसर्जनत्वसिद्धिः । यत्तः केपदसंज्ञेपि प्रतीयमानत्वात्पर्ये पूर्वकालसंबं
१४८ धित्वस्यकेनचिदनभिधानेनोक्तार्थानामप्रयोगइतिन्यायानवतारात्ताशंकोस्यात्तसंभवात्तस्यपवाच्य
सूक्ष्मत्वस्यपस्यत्वेधात्वर्थविशेष्यतापानव्यातामपिसंभवात्वेनपूर्वकालः कार्यो धात्वर्थप्रका
रत्वेनेतिपूर्वग्रंथविरोधाच्च । नचद्योतकत्वाभ्युपगमाद्युक्तसंगतिः षष्ठ्याः संबंधवाचकत्ववदस्मी
षीमपिसंबंधवाचकत्वमिति पुनस्तग्रंथविरोधात् नचतदपिसुवचं समानकर्तृकत्वादीनां वाच्यता
याः सत्त्वात्वलाभात् । तस्मात्क्रमेणैव वर्तीपव क्रियासंबंधविशेषकत्वमेवक्त्वादीनामिति केपरो
क्तमेवसम्यगिति । मनोनंतरं हूत्वापितु मुपलक्ष्यतिः पश्चिति क्त्वा चामिति । समानकर्तृकयोः पूर्वका
लेइत्सुक्षप्योः पदयोर्वेद्रुह्यी हित्वादिशेषेण पूर्वकालस्यवाच्यत्वमितरार्थस्य द्योत्यत्वमिति विपर्ययेवीजा
भावादिति भावः वैषम्यबाधकमाह । अन्यथेति । तस्य क्त्वाप्रत्ययस्यवाच्यत्वेइत्यर्थः तृतीयाप्रसंगा राम
दिति क्त्वाप्रत्ययेनकर्तुरनभिधानादितिभावः नत्वनभिहितइति सन्नेन ज्ञः प्रसज्यप्रतिषेधार्थक १४

तथाप्रकृते कर्तुराख्यातेनाभिधानात्तृतीयापत्तिरित्याशंकानिराचष्टे । नचेति । अनभिहितइ
तिनप्रसज्यप्रतिषेधोवाक्यभेदप्रसंगात् न चानुपपत्त्यानत्वीकारः वक्ष्यमाणभाष्यविरोधात्तथा
याचैकेनाभिधानेप्यन्येनानभिधानात्तृतीयापत्तिरित्यभिप्रायेणाह पाककर्तुरित्यादि तत्
द्भावादिति । अभिहितभिन्नत्वादित्यर्थः अनत्वेवेति नसूत्रस्थनञः पर्युदासार्थकत्वादेवेत्यर्थः
भाष्येइत्यस्यानभिहितसूत्रस्थेइति शेषः नस्येति । समानकर्तृकत्वस्येत्यर्थः द्विवचनप्रकृतिवदभी
हितत्वसमानकर्तृकत्वस्य धात्वर्थविशेषणत्वेनैव प्रतीयमानत्वेनानुविधीयमानत्वादितिभावः तदेव विश
दयति । अन्यथेति । एतत्सूत्रस्थकर्तृशब्दस्य प्रतिपादकत्वेइत्यर्थः समानेति तदुपादानाच्चकर्ते दू
पर्यस्यकालाभः स्यात्स्यादिति । कर्तरि कृदितिवत् एवंतुतत्तुनतथासंभवतिकर्तेरकृदितिसूत्रेणो
क्तताद्यर्थत्वादव्यवहृतोभावइतिवार्तिकविरोधाच्चेतिभावः । उक्तमुपपत्तिं निरस्यति । तृतीयापाद
नेत्विति । आख्यातार्थक्रियापादइति क्रियाद्वयनिरूपितकर्तृशक्तरेनेकत्वेपि प्रधानतिङर्थ

भू.सा.
१४८

क्रियानिरूपितकर्मशक्तेराख्यातेनाभिधानेतत्र कृदंतार्थक्रियानिरूपितत्वस्य शक्तेरनभिहितायाअ
प्यभिहितत्वातिदेशस्यात्र अनभिधानेवनभिहितत्वातिदेशस्य चोक्तभाष्यप्रामाण्येनाभ्युपगमा
न्नतत्तीयापत्तिः प्रकृतेइतिभावः प्रधानेतरयोरितिगुणप्रधानक्रियानिरूपितशक्तिद्वयंयत्र
कस्मिन्द्रव्ये तत्र गुणक्रियानिरूपितशक्तिः प्रधानक्रियानिरूपितशक्तिधर्मेमनुरूपणद्वीसयोः
तुका निर्देशौ पित्तसमनिमाह प्रधानविषयेति प्रधानविषयेतिनिरूपकत्वाश्रयोवा यस्याः सा श
क्तिर्यदा प्रत्ययेनतिङा भिधीयतेतदा गुणक्रियावाचकधानतरप्रत्ययेनानभिहिताप्यभिहि
तवत्प्रतीयतइत्यर्थः इदमुपलक्षणं अभिहितायाअपि अनभिहितवत्प्रतीतेः तत्र प्रासा
देआस्तइत्युदाहार्यं अत्रवस्यचेत्समभ्युपेतव्यमन्यथाकर्तुः क्रार्थत्वाभ्युपगमेनोक्तस्यसत्त्वती
यापत्तिवारणेविपक्ष्यौ दनोमयाभुज्यतइत्यत्रौदनपदोत्तरं द्वितीयोपपत्तिर्दुर्वारा तत्र पाक
क्रियानिरूपितकर्मशक्तेः कृतानभिधानाद्कारीतेरसंभवादित्याह किंचेतिः अत्रेदंबोध्यं। रम

पत्रौदनेपाकक्रियानिरूपितकर्मत्वस्यैववशाद्विषयत्वमभिप्रेतंनतुप्रधानक्रियानिरूपितकर्मत्वस्यापि
नत्रौदनंपक्त्वाभुज्यतइत्यसिसाधुत्वओदनस्यभोजनकर्मत्वापत्त्यार्थिकत्वात्। यद्वानभयकर्मत्वस्यै
वशाद्विषयत्वमभिप्रेतंतनदौदनपदाद्द्वितीयाअत्रसाध्यैवउक्तव्यवस्थितेःपरंत्वाख्यातवाच्यक्रि
यायाः प्राधान्यात्तांप्रत्येवक्त्वातोपस्थिताः सर्वाः क्रियागुणीभवंति। नतुतासांपरस्परंविशेष्य
विशेषणभावः गुणानांचपरार्थत्वादितिन्यायादेवंचस्त्वावापीत्वाभुक्त्वाव्रजतिभुक्त्वास्त्वात्वापी
त्वाव्रजतीत्यविशेषेणप्रयोगाः तमुनन्तानार्थ्येनुपमुदेश्यत्वमपिवोसंक्रियापर्यायं क्रियापामिस
तेः नान्निकर्षस्यैवतद्वेद्व। तुम्प्रकृत्यर्थोपपदार्थयोस्तादर्थ्येवत्समानकर्तृकत्वादिकमपिसंवध्यतः न
पाचहरिंद्रष्टुंयातीत्यत्रहरिकर्मकभाविप्यद्दर्शनोद्देश्यकंदर्शनकर्तृत्वकंयानमितिशाब्दधीः अत्र
पेवादिशैधानाहारकोव्रजतीतिवोधकइत्यादिनीयः इतिसारदर्पणेक्त्वाद्यर्थनिरूपणम्। अथ श्रीः इत्यं
व्याकरणादिनागृहानश्रुतिकपदसमुदायादनासन्नादगृहीतायतेनास्यकादपोगपादना

कांक्षाद्यु शाब्दबोधादर्शनात्ससादिकमपि गृहीतव्यमिति रूपदज्ञानेन शाब्दबोधे जननीये सहकारि
त्वमास्तामिति स्वप्रकृतेन बोधाननुकूलपदाव्यवधानं आसत्तिश्च पर्वेनोक्ता निखिलानि सन्निहितानि तादृशपदाव्यवधा
नं। ननु गिरिर्भुक्तं वह्निमान्देवदत्तेनेति न ततो बोधः अतस्तस्याप्यासत्तित्वं इसंपचनीयत्वं तं इसकर्म
कस्यास्यधिकरणाकांक्षिपेति बोधे नानासत्तिता। न घटकसर्वेषां पदानां तादृशबोधानुकूल
त्वात् स्यात्सांपचनीयेतावन्मात्रबोधे पुनरिनासत्तिमेव यद्गोकादौ तु योजनावाक्यादेव बोधः।
नन्देमेणानासत्तात्प्रबोधदर्शनात्तत्तानमेव हेतुरिति सम्प्रदायः न च्याख्यातुमो निश्लोकादन्वयबो
धानुदयप्रसंगात् लोकोव्यवधानमासत्तिः श्लोकासादिस्थतेनासत्त्वंज्ञाते च सति व्यवहिताद
व्यवहिताच्च बोधदर्शनात् तज्ज्ञानविलंबे न शाब्दाविलंबाच्च किं त्विदं पदमेतस्येन संभपोन्वयु
बोधजनकत्विसाकारकपदस्तस्य पर्यन्तं पाभिसंधाय यदिच्छासा। ननुवक्रिछामो निश्लोकादौ
षन्नादवस्यात्। अकवाक्येतु भगवत्तास्यपर्यमादपि वगनिरिसाङ्ः वक्रत्वनतु सस्यर्पताप्यज्ञा

नेपदज्ञानस्यर्पज्ञानविलंबेन शाब्दबोधाविसंवादस्थापदजसापदार्थानामव्यवधानेनोपस्थि
तिरेवासत्तिस्तत्र पसत्तत्वपबोधहेतुनहि पदार्थानामनुपस्थितावन्वयधीः केनाप्यनुभूयते
इति। अर्पतात्संपत्ति इंपदमेनस्मिल्लघुः परपदार्थान्वयबोधपात्रिसभिसंधाय यदिच्छा सर्वानि
शुक्रवाक्येतु भगवतस्तस्यासाविसंवादित्वानुमित्तपितुरेव। अस्यसंशयेव्यतिरेकनिश्चयेचान्वयाबो
धात् न्दमेणान्वयबोधदर्शनाच्च तज्ज्ञानमप्यन्वयबोधहेतुः अधिकमग्रेवक्ष्यते। शाब्दबोधयो
ग्यतापास्तानेकारणमिति चेद्भवः सांके कपदार्थे परपदार्थस्य यादृशसंसर्गवत्वं। तादृशसंसर्ग
वत्तेव महत्तनशाब्दबोधविषयसंसर्गवत्त्वमिति यावन् आसत्तिश्चपूपसासिंचनीसत्त्वसेके पपःकरण
कत्वस्यसंसर्गः अतस्ववकरकाभिप्रायप्रयुक्त पयसासिंचनीति वाक्यं नयोग्यं पयःपदार्थकर
कार्यासेकुकरणत्वाभावात्। यादृशेतिविशेषणाच्चाकाशं शब्द इति वाक्यं समवायसंसर्गेमा
ज्ञापनाभेदान्वये योग्यं अयोग्येषेन न्दमेणान्वयदर्शनादेतज्ज्ञानस्यापि हेतुना। ननु संसर्ग

भः सा स्यवाक्यार्थत्वेन तद्बोधात्प्रागनुपस्थितस्य वाक्यार्थं न तद्बोधस्य पतनभ्रतत्वमिति चेन्न हि योग्यताज्ञानत्वेन त
१५१ स्य च न दोषो स्फायसाक्षिवर्तीयादोसेकः पयःकरणको न वेति संशयात्मकस्य भवत्वे घटोऽस्ती
त्याद्ये च प्रात्यक्षिकनिश्चयपक्षस्यापि न प्रावृत्तोऽलभ्यात्। स्वजन्यशाब्दबोधस्य बाधान्वयबोधप्र
तिबन्धकत्वयोग्यताबोधानन्तसंभवात्तः किंतु लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ता
बुद्धित्वावच्छिन्नप्रतितद्भाववत्ताज्ञानाभावस्य हेतुतया शाब्दबोधस्यापि न कार्यतावच्छे
दकाक्रान्तयाः योग्यताज्ञानसत्त्वेन तद्भावादेव शाब्दबोधवारणे कृतं योग्यताज्ञानस्य तद्धे
तुतया। कार्यतावच्छेदककोटौ प्रत्यक्षान्यत्वनिवेशनेनैव लौकिकप्रत्यक्षनिरासेऽपि घटादुपनी
तमानसं स्मृहायनद्विहायाजन्यान्तद्रूपनिवेशः न च बाधनिश्चयाभावत्वापेक्षया संशयनिश्चय
साधारणयोग्यताज्ञानत्वे हेतुत्वे लाघवमिति वाच्यं स्यादेवं यदि बाधाभावस्य शाब्दत्वे कार्यता
वच्छेदकं कल्प्येत किंतु शाब्दके धस्य बाधाभावकार्यतावच्छेदकाक्रान्तनयाग्रदृशा योग्यताप्रतिषेधामः

अतएव घटोऽभिधेय इत्यादिवाक्यबाधासिद्धावपि न क्षतिः न संसर्गावच्छिन्नतत्प्रकारकतद्विशे
ष्यकबुद्धित्वस्यैव तत्कार्यतावच्छेदकत्वात्। घटाभावेऽभिधेयत्वप्रतियोगिकत्वस्य ममारोपतदभा
वस्यापि प्रसिद्धेर्व्वेत्याहुः। अन्ये वदन्ति। न हि तद्विशिष्टबुद्धिसामान्ये बाधाभावः कारणं किंतु का
र्यावतारदृष्टासत्त्वव्याहार्य्यप्रत्यक्षोदयादिच्छाया उत्तेजकत्वानुरोधेन प्रत्यक्षत्वस्यैव प्रतिबध्यता
वच्छेदकत्वावश्यकत्वेनोपनीतभानसाधारणप्रतिबध्यतायाः शाब्दबोधेऽसंभवात्। न च तथाप्य
नुमितिसाधारणप्रतिबध्यतायाः शाब्दबोधसाधारण्यं शंक्यं। तत्साधारणस्य प्रत्यक्षान्यज्ञानत्व
स्य प्रतिबध्यतावच्छेदकत्वे प्रत्यक्षान्यज्ञानत्वयोर्मिथो विशेष्यविशेषणभावे विनिगमनावि
रहेणानेकप्रतिबध्यप्रतिबन्धकभावापत्तेः प्रतिबध्यतावच्छेदकगौरवापत्तेश्चानुमितित्वस्यैव
तदवच्छेदकत्वस्यांगीकरणीयत्वात्। अतो बाधाभावस्य स्वातन्त्र्येणैव शाब्दबोधं प्रति हेतुतावा
च्यात् तत्र चोक्तगौरवेणासंसर्गाग्रहयोग्यताज्ञानस्यैव हेतुत्वमुचितं। अपि च शाब्दबोधे तद्वदन्योन्या

मु: सा:

भावतद्भावव्याप्यवत्ताज्ञानादीनां प्रतिबंधकत्वकल्पनापेक्षया लाघवाद्योग्यताज्ञानस्यैव हेतुत्व
१५२ मुचितं किंच । यथा संशयितीति शाब्दसामग्रीकाले सैकधर्मिकः करणकत्वाभाववत्तानिर्णयमानसवारणा
यतन्त्र शाब्दबोधसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं । मन्मते तत्र योग्यताज्ञानस्यावश्यकतया वि
परीतज्ञानोत्तरमस्युक्ते विशेषदर्शनस्य हेतुतया न तद्भावावेव तद्वारणा न् । विशेषदर्शनसत्वे तु न
द्भावव्याप्यवत्तानिर्णयं न प्रतिबंधकसत्वेन शाब्दसामग्र्याः स्त्वोभावेन तथा मानसेड्यापत्ते ।
न च निर्णयं मत्येव विशेषदर्शनस्य हेतुतया शाब्दसामग्रीकाले मानससंशयवारणाय शाब्दसाम
ग्र्याः प्रतिबंधकत्वे कल्पनीये संशयत्वेन निवेश्य सैकत्वावच्छिन्नविशेष्यकपक्षयः करणकत्वाभावप्र
कारकमानसत्वमेव तत्प्रतिबध्यतावच्छेदकमिति नातिरिक्तप्रतिबध्यप्रतिबंधकभावकल्पनेति
वाच्यं सैकत्वावच्छिन्नविशेष्यकपक्षयः करणकत्वप्रकारकमानसे शाब्दसामग्री प्रतिबंधकत्वात्तर
कल्पनयापत्तेनैव संशयवारणेन संशये प्रतिबंधकत्वानराकल्पभावात् । न च विपरीतज्ञानोत्तरप्र रम
१५२

सक्ते विशेषदर्शनस्य हेतुत्वसिद्धावेव योग्यताज्ञानस्य हेतुत्वसिद्धिरिति वाच्यं । गुरुमते शाब्दसाम
ग्रीप्रतिबंधकत्वकल्पनापेक्षया न हेतुत्वकल्पनाया एवौचित्यात्तदपेक्षया विशेषसाधनत्वाद्विज्ञाना
नांयह्नो हेतुनासिद्धिरिति संपरमतान्तवर्णनेन घटः कर्मत्वमित्याधाराधेयभावेनान्वये निराकांक्ष
त्वाद्या घटीयाकर्मतेति बोधानुदयादाकांक्षा विसहकारिणी सा च पदत्वदेपत्यद्समभिव्याहाररूपयु
क्तपदद्विशेष्यकयत्संसर्गकपत्यकारकबोधजनकत्वं तत्पदे तत्पदनिरूपिताकांक्षा यथा घटमानय
नीत्यत्र घटपदे कर्मताविशेष्यकाधेयतासंसर्गकघटीयाकर्मतेति बोधोपयिकाम्यदनिरूपिता
कांक्षातां विना घटः कर्मत्वमित्यत्र घटपदेन तादृशबोधाजननात् । एवं धातुपदे प्यात्यानिरूपि
ताकांक्षोष्यान्ययनस्ववनयनंकृतिरित्यत्र नानयतामुकृत्याकृतिरितिबोधः धातानाख्यानासमभिव्याहा
रात् । इयमेवाकांक्षा व्याकरणेन प्रतिपाद्यते न याचनत सदेनतत्स्य तदपर्वापरीभावनयस समभिव्याहा
रः सैति षत्वनितां विना घ्युत्पत्तिनाकांक्षेक्यमेतत्पदे स्यादत्वम्य मदशायां घटीयाकर्मतेति बोधापत्ते

भ॰सा॰ १५३ तज्ज्ञानंहेतुर्नेतुसन्नपसत्रीसाानचजनितान्वयबोधाहृप्मासुनरपितादृशबोधापनिरूतकांक्षा
यास्तदानीमप्यविकलत्वादितिवाच्यंप्रकृतान्वयबोधसमानाकारबोधानुपहितत्वस्यापिसत्व
प्रसनत्र्यावाकांक्षात्वेनजनितान्वयबोधस्थलेतदभावेनाप्रसंभवात्।तात्पर्यविषयत्वनपप्रकृ
तत्वेनबोधविशेषणताप्रबोधद्वयंज्ञापनामितितात्पर्यसत्वेनजनितान्वयबोधस्यद्वितीयबोधे
निराकांक्षत्वंरवसमावेसुकेष्वंनजनिताबोनरबोधस्यमहावाक्यार्थबोधनत्वेःनव्यास्तुअय
मद्रस्यपत्तव्यतिरेकप्रयुक्ततात्पर्यविषयीभूतान्वयाननुभावकत्वेनेनसहनस्याकांक्षाआत्र
यमेतिपुत्रोराज्ञःपुरुषइतिवाक्येराजपुत्रसंसर्गप्रतीतौछपोश्वरिनेराजइस्सस्यपुरुषेणसाकां
क्षत्ववारणायान्वयप्रबोधेतात्पर्यविषयत्वंविशेषणंपुरुषान्वयेतात्पर्यसत्वेनुसाकांक्षत्वमपिमि
वंचतात्पर्यज्ञानस्यशाब्दबोधयुपथेनुताःअगृहीतात्पर्यतात्पर्यकेनिराकांक्षाज्ञानाभावादेवा राम
न्वयबोधापत्त्यभावादित्याहुः एवंचशाब्दबोधान्यागवश्यप्रकृसनतस्यरसममिव्याहारनयाकांक्षये १५३

वान्वयपत्र्यवाक्यार्थभानोपपत्तौवाक्यस्यनत्रशक्तिनिष्प्रयाजनेतिनैयायिकादयंतिमीमांसकादयस्तु
वाक्यस्यन्त्रनत्ववणोवनतुतत्रशक्तिरितितन्मतेत्वंइयितुस्फोटनिरूपणमितिसाशयेनमूलमवतारयति
सिद्धांतेति।यद्वान्तरुतीत्यामहृतिमसपेषुव्याकरणेननतदर्थबोधकत्वपशक्तिप्रतिप्रतिपादकस
मनुपलंतत्प्रतिपादितशक्तिप्रकृतिमसयाप्रवर्णेपिजहीद्वृत्तःप्रचतीत्यादौकत्वविशिष्टदेवद
त्तकर्तृकपाकक्रियायास्वोधात्वोत्साशंकानिराकरणायस्फोटनिरूपणमित्याहसिद्धांतेतिघर्षमितितत्वाचो
घातस्संगतिरत्रेसवदेपंअष्टानांस्फोटानामाकरसिद्धतपातद्वावर्णसाभइस्साशयेनाहतवर्णक
मितितिप्र्यपोजनकमिसर्पः इरर्यकमितितइपाददानेवाक्यातिरिक्तानामसंग्रहापत्तेरितिभावःस
माधनेतपापीति।अन्येषां।वर्णादिस्फोटानामिसर्गःतत्रस्फोटत्वंस्फुटत्यभिव्यक्तीभवत्यस्मादि
तिमुससार्थप्रकाशकत्वंप्रकाशप्युत्तनं।तयावाचनिष्ठविषयतामप्रयोजकशक्तिमत्वंपर्यवस्य
तिवर्णेस्पेचनत्ला।अपुपगमेवर्णस्फोटःपदादीनांततासुपगमेतुपदादिस्फोटइतिव्यवहारःअवा

स्तवत्वेति। वर्णस्फोटादीनामाकांक्षातिवर्तकत्वाभावादवास्तवत्वं शास्त्रीयप्रक्रियानिर्वाहाय प
रं सिद्धं नेतन्नवीकारः पारमार्थिकत्वं तु वाक्यस्फोटस्यैवेति भावः विप्रतिपत्तिरिति संशयोपपादकत्वेनोप
पस्थापकं वाक्यमित्यर्थः। ननु संशयजनकं वाक्यमेव सा परोक्षं ज्ञानं निश्चयात्मकमेवेति प्राचीनप्र
वादेन संशयजनकत्वस्य वाक्ये ऽसंभवात्। वस्तुतस्तु संशयजनकवाक्यत्वमेव विप्रतिपत्तित्वं तन्न द
भावसहचरितधर्मवद्धर्मितावच्छेदकस्यैव समानानेकेति सूत्रेण विप्रतिपत्तेरप्याहत्यैव संशयहेतुत्वोक्ती
र्नानादित्व वध्येयमत्ते अस्य साधुशब्दान्तर्गतवर्णा वाचकता विचारणा वस्तुतस्त्वेमस्वोक्तसाधित्ति। अत्र
साध्वन्तर्गतवर्णत्वसामानाधिकरण्येन वाचकत्वादिसिद्धौ नेतदुक्तरूपविप्रतिपत्तित्वासंभवः। न
चापि केरपि साध्वन्तर्गतानां केषांचिद्वाचकत्वाभ्युपगमात्। तन्नादयस्त्वावच्छेदेन वाचकत्वादि १५४
साधने तु वैयाकरणानां परेषां वा शक्तौ वाधश्चात अहत तस्यतादृति। ननु यथाश्रुते साधुशब्दा

र्गता वाचकास्तदन्तर्गतवर्णसमारितानेतस्य पक्षाभावेन तद्धाक्ववि भिन्नधर्मिबोधकत्वाद्विप्रतिपत्ति
त्वस्यैवासंभवः एकधर्मिकविरुद्धकोटिकसंशयजनकस्यैव तत्त्वादतो व्याचष्टे सारे। साधुशब्दान्त
र्गता नाद्रति साध्वन्तर्गतवर्णसमारितादृश्यस्य पः यथाश्रुते साध्वन्तर्गतविपरीतानुपूर्वीकवर्ण
नां वाचकत्वस्य केनाप्यनभ्युपगमाद्बाधसिद्धसाधनयोरापत्तेः। तन्नमारितत्वं च शास्त्रबोधिता देशा
देशिभावनिमित्तनिमित्तिभावान्यतरसंबंधेन। तेनास्यापत्यमिरिपानित्यादेर्नासंग्रहः। विधिको
टिरिति समुच्चयव्यावृत्तये कोटिनास्य विषयता संशयपक्षावच्छेदकी निरूपनायोक्तं कोटिरिति। अप
न्येषां नैयायिकानां तेर्षकं मते शक्तौ जसमोडित्यादिविहितमस्त्ययानामेव वाचकत्वं तिघिसर्गादी
नां त्वादेशस्य स्थानित्वेनाबोधकत्वमेव लिपिवृद्ध्यभ्युपगमात तथा च साध्वन्तर्गतवर्णसमारितत्व
र्णत्वावच्छेदेन मतभेदेनाभयसाधनान्नोक्तदोषद्वय इति भावः। यथाश्रुत मत्तोक्तविमतिपत्तिमनुरुद्ध
स्याह। साधुशब्दत्वस्यादिनन साध्वन्तर्गतवर्णानां बोधकत्वसाधनेपि न वाचकत्वसिद्धिरतस्या

श.ला
१५५

हृ बोधकत्वावच्छेदकमिति तस्यैवेति। बोधकत्वस्यैवेत्यर्थः प्रागिति। शक्तिनिरूपणावसर इत्यर्थः। नत्विति। बो
धकत्वसिद्धौ च तदन्यथानुपपत्त्या पदार्थान्तरत्वापत्तिः शक्तिरपि सिद्धेत्तदभावे तु साऽपि नेति। वाचकत्वसामा
न्याभावसिद्धिरिति भावः। नैयायिकमतं दूषयितुमुपन्यस्यति। यत्विति। पत्विति। वाचकताभावेप्र
योजकमाह तेषामिति। वक्तृत्वेनेपुपस्थापनमनुगमकधर्माभावस्यापि निरुक्तत्वसुत्वादीनामेव वचन
त्वदिवदनुगमकत्वासंभवादिति सादेः तायुपस्थितिं विनापि कृत्याघयोपस्थितेर्व्यभिचारेणाशक्तता
नवच्छेदकत्वाच्चेति बोध्यं ननु तिवांघादेर्विनापि तत्तदनुवंधभेदेन तानात्वात्तोकरीसा तेषां वाचक
त्वमतआह एषामिति। अनुप्रयुज्यमानधातन्तरैशादिना पिनद्धेबोधोपपत्तेर्नोक्तदोषो नआह अस्ते
ति। आह एधामिति। अनुप्रयुज्यमानधातन्तरैशादिना पि तदर्थबोधोपपत्तेर्नोक्तदोषो तआहश्वस्त्वे
ति। आदेशा र घति ष्योलिङ् धु गि त्यादिसंग्रहः लुगादेरित्यादिनानुलोपयोः सः तैरिति। आदेशैरित्यर्थः राम
उक्तदोषमाशंक्याह। तत्वस्येति जातिरूपतया। सशादिलेषु लक्ष्मनुगतप्रतीत्या न सिद्धिरित्यभिमानः १५५

न्यथा तु शक्ततावच्छेदकतया न तत्सिद्धिः सर्वलकारसाधारणलत्वस्यातिप्रसक्तत्वाशलकारमात्रवृ
त्तेस्तु शक्तिग्रहासत्वेमनुपस्थितेः पचाम्यादौ कृतिबोधापत्तेस्त्वशक्ततावच्छेदकत्वासंभवाच्चेति
स्थानत्वादिकमेव तदवच्छेदकमित्याह तथा चोक्तं विमतिपत्तिः प्राचीनैः सह विवादस्थलेति बोध्यं
अव्यभिचारेणेति। लत्वावच्छिन्नशक्तिग्रहस्यकृतिबोधासर्वनियमेन सत्वान्निवादीनां शक्ततावच्छे
दकत्वे तु तदवच्छेदकत्वे तु तदवच्छिन्नशक्तिग्रहं विनापि तत्सादृशकिग्रहात्कृतिबोधेनादेशवाच
कतावादिमते व्यभिचारो दुर्वार इति भावः ननु कार्यतावच्छेदककोटावप्येहितो न स्तानिवेशान्ने
यमापत्तिरत आह। लः कर्मणीति। इत्यादाविति नञर्थवादेशिनामेव वाचकत्वं सममाणमिति तन्त्रा
वः स्वसाधकेति स्वमतपरिपोषकेत्यर्थः व्यवस्थितेरित्यादि पंचम्यंतं नयस्य पर्वकारिकास्यबोधकप
दार्थः स्वयं मदंशपत्ताद्व्यवस्थितेरित्येतद्धि हरणोति। व्यवस्यानुरोधादिति प्रमाणेन पदार्थे नि
र्द्धारणे व्यवस्थान्यथानुपपत्तेरित्यर्थः शक्तिमदिति लत्वावच्छिन्ननिष्ठवाचकत्वस्यतन्त्रारो

पापादित्यर्थः मानाभावादिति विषयबाधस्यैव भ्रमत्वे तंत्रत्न पापप्रकृते बोधकत्वशक्तेस्तत्राबाधा
दिति भावः नन्वादेशानां कृत्स्नमेव तत्र शक्तिस्वीकारे बाधकमत आहादेशिनामपीति वैयाक
रणैः शाक्रदापन्नप्रकृतिभिः व्युत्पत्त्येनिष्टमेव वाचकमिति तिनिष्ठोरणानुपपत्तेरित्यर्थः अनु
शासनस्य सर्वत्राविसत्वादिति भावः सर्वेषामित्यस्य विनिगमकाभावादित्यादिः ननु न यापा
देशापेक्षयादेशिनामस्त्वेन तत्प्रयुक्तलाघवादादेशिष्वेव वाचकत्वसंभवनीत्यत आह व्यभि
चारश्चेति। न तु विनिगमनाविरहादेवादेशिनां वाचकतास्ति द्धिरत आहादादेशानामिति तत्प्रोचगौ
रवादिदोषस्यानत्यरिहारस्य चोभयोः साम्येप्यादेशिस्मरणकस्यनाविरहप्रयुक्तलाघवस्य हक
तप्रयोगनैयत्यमेवादेशानां वाचकत्वे विगमकमित्याखंड सार्थः ननु बोधकताप्रशक्तित्वेऽन्यव
मवकुल्क्यव्यवस्थोपपत्तिः न च बोधकत्वस्य शक्तित्वं तन्मं नसिद्धं किंतु संकेतस्य पदा[illegible]स्य पदा राम
नत्वं। तपावानुशासनेन पश्नसाप्रतिपादनेनैव तदंगीकारे एकपं। निवादिषु तत्सिद्धिः स्मर १५६

णकस्य नागौरवं तु प्रामाणिकत्वान्न दुष्टमित्यस्य रसात्प्रयोगेष्वप्रमाणानां निवादीनां वाचक
त्वे साधकांतरमनुपन्यस्यतीत्याह साधकांतरमिति मुख्यमिति मुख्यत्वं च तत्र शक्तिग्राहकांतर
मनुपन्यस्यतीत्याह साधकांतरमिति मुख्यमिति मुख्यत्वं च तत्र शक्तिग्राहकांतरनिरपेक्षत्वं
व्याकरणादिना शक्तिग्रहे नियमेन तद्ग्राहकांतरापेक्षणात्। सत्वेति व्यवहारजन्यशक्तिग्रहं
श्वेस्य पूर्वः तिङादिवैवेति। व्यवहारेणापूर्ववाक्येन हृष्टेप्यावापोद्वापाभ्यां पश्चात घटकतिङादि
ष्वेव तच्छक्तिग्रहापदिति भावः ननु प्रयोगांतर्गतवर्णेषु सर्वेषामिह व्यवहारेण शक्तिग्रहे घटमानये
सांतर्गतशब्दादीनामपि वाचकत्वापत्तिर्न च सेष्टाविकरणानोनैरर्थ्यकमिति सिद्धांतव्याको
पात्तिं विचानपनादिव्यवहारस्य लोनाघेतप्रयोगंविनाऽसंभवेन नाहृशप्रयोगांतर्गतवर्णा
नां तेन तत्र सिद्धावपि तदंगहितवार्णांतर्गतवर्णेषु वाचकत्वमनुशासनेनैवेष्यंतपाचनत्वादे
शिनां वाचकता सिद्धान्तात्प्यादेशेषु साकल्यासरवरसादाह किं चेति। तदेवेति। तद्धेतोरेवत

भू: सा:
१५८

नव्यैस्तैः पाणिकनयेतुनेयमापत्तिः तैः प्रयोगान्तर्गततिङादीनामेववाचकतायाअभ्युपगमात्। धातुप्र
त्ययसमुदायस्थलेतन्नदर्थबोधोपपादनं प्रत्ययोः समभ्यस्यलक्षमित्यवधेयं। इत्यस्वितित्यपाचनद्रूभयत्रा
नैवकर्तृलाभः कृत्याश्रयस्यैवकर्तृत्वादितिभावः। अन्यथेति। अनाकांक्षेपिशाब्दभानेमहत्तावित्यर्थः
शक्तनावृक्षेस्कंभेदस्यतन्नापिसत्वादितिभावः। सामानाधिकरण्यानुरोधादिति। शानचः कृतिवाच
कत्वेसर्वानुभवसिद्धभेदान्वययोधानुपपत्तिरित्यर्थः। लडादेशस्वबोधनपरंधात्वर्थेवर्तमानत्वमतो
तिरेवेतिबोध्यं। पचतिकस्यमिति। इदंचरवाघुंतंनामेतिमतमनुस्त्य। सत्वप्रधानानिनामानीति
कृताद्द्रव्यविशेष्यकबोधजनकत्वंनामत्वं। नदेवचनामार्थयोरितिव्युत्पत्तिवदकं। अभेदघनिपातार्थ
स्याभेदान्वयइतिमतेनेदद्दूषणमितितुपरेसलक्षणोत्यस्पलस्येतिशेषः। आपत्तेरितिनचसानवेद्येति
भावनत्वादेशानांवाचकत्वेऽप्यादेशिशक्तिप्रतिपादकत्वः कर्मणीत्यादिसूत्राणांवैयर्थ्यमतआह १५८
कर्मणीति। उक्तमिति। आख्यातशक्तिनिरूपणावसरइतिशेषः। एवंचप्रयोगेऽपमाणमहति

मस्यपचवठकवर्णेषुशक्तिर्वर्णस्फोटइतिपर्यवसन्नम्॥ इतिभूषणसारदर्पणेवर्णस्फोटनि
रूपणं। पदस्फोटनिरूपणात्पूर्वजीव्योपजीवकभावस्यापिसंगतित्वंसूचयन्मूलमवतारयति।
स्वमिति। उक्तरीत्येत्यर्थः। आदेशानामपिकेषांचित्प्रयोगान्तर्गतत्वादाहेति। विसर्गवयइति
प्रयोगान्तर्गतवर्णइतिपावनं। चतुतारशपावहूर्णानांवाचकत्वेकथंपदस्फोटसिद्धिरतोभावा
र्थमाहापमिति। समभिव्याहृतेसुक्तापसिद्धरति। आनुपूर्वीविशिष्टतावतांवर्णानामवाचकत्वआ
नुपूर्व्यारूपपदस्यवाचकत्वाशाहूराशेतिभावः। ननुसमुदायस्यप्रत्येकानतिरिक्तत्वेनवाचकतापाः
प्रत्येकवर्णेष्विव्याप्त्यामोवाच्यस्त्यपावचकत्वंनाहस्राववर्णसमुदायरूपपदस्यवाचकत्वेनत्प्रत्येक
वर्णवाचकत्वंनिरस्यति। प्रत्येकवर्णेमिति। अनुभवविरुद्धत्वादिति घटशब्दादसमर्थप्रत्येमी
त्येवप्रतीतेरित्यर्थः। बाधकांतरमप्याह। प्रत्येकमिति। अपर्यवस्यइति। नदभ्युपगमइत्यर्थः। नत्वो
पास्यसाद्दिनाजश्वपरिग्रहः। तथाचसमुदितानामेववर्णानांवाचकत्वमुपपन्नमचोक्तपूर्वासमुदा

भ.:सा: पस्य वाचकत्वं निराबाधं स्तम्ब एवास्माकं पदशब्दव्यपदेश्यत्वमिति भावः ननु वर्णानां प्रत्येकं वाच
१५९ कत्वस्य गौरवपराहतत्वात् देवासंभवात् समुदायस्यैव न तन्नेस्य तीसादेशवाचकाभ्रेदिनिस
मभिव्याहृतवर्णानां वाचकत्वस्यापि गौरवपराहतत्वादेवासंभवात् समुदायस्यैव न तन्नेस्य
तीसादेशवाचकाभ्रेदिनिसमभिव्याहृतेत्याह तुत्वोपन्यासो विफल उत्पन्न प्रत्यपितत्वशंकाया
आवसरे रोधवनिरासाय स तत्राह एतत्त्वेति । समभिव्याहृतवर्णानां वाचकतया पदस्फोटत्वेत्तु
त्ववेत्यर्थः चरमवर्णस्यैव पदत्वे पूर्वमाणा चरमवर्णस्यैवेत्यर्थः एवकारेण पदघटकतत्त्वा
तनवर्णास्तुच्छः सः तत्र हेतुमाह शक्तेरिति । तत्र पसंबंधात्मिकायां बोधकारणतापापत्त्यांस
त्वासंभवात् चरमवर्णश्रवणादेव बोधोदयेनान्यत्र तत्सत्त्वे मानाभावाच्चेत्यर्थः ननु तस्यैव वाच
कत्वे तन्मात्रश्रवणादर्थबोधापत्तिरत आह । पूर्वपूर्ववर्णेति । नसद्घटकपूर्वपूर्ववर्णेत्यर्थः राम
मतान्तरेणेति । समभिव्याहृतवर्णानामवाचकत्वे तत्समुदायघटपपदस्य सुतरामवाचकत्वमिति १५९

पन्नतां नरं तत्त्वं इत्यपेत्यर्थः उक्तमित्यस्य मत्वइति शेषः तत्कस्येह घर्षणं तरमप्याह रामोत्तीसादिन्य
पंबोधायस्येति । वस्तुतस्तु नियमापत्तिः उद्बोधकसमवधानस्य फलानुमेयत्वेन तादृशस्थले फला
भावेनोद्बुद्धसंस्काराभावादिति तत्तु समभिव्याहारेण सम्भवः वर्णानां क्रमिकाणामाशुवि
नाशिनां चैतद्संभवात् । अतस्त्वाव्यवहितोत्तरत्वसंबंधेन पूर्वपूर्ववर्णवत्त्वात् तस्यैवात् । ना
पि वर्णसमवेतपदार्थान्तरे मानाभावात् अन्यथा तदनुगतीकृतवर्णानां वाचकत्वेनैवोप
पत्तौ पदस्फोटस्य निरासे यतनापत्तेः पद्यपुस्तकाद्यर्थानां वर्णानां एवदर्शनात् एकत्वैकं पदस्फोटः सि
द्ध इत्यत आह दिगिति । नदर्थस्तु वर्णसमुदायः पदं न तु वर्णं इति प्रतीतेर्वर्णातिरिक्तपूर्वापरीभूत
तत्समुदायात्मकपदस्वीकारस्यावश्यकः अतएव पदे वर्णाइति व्यवहारोपि स्वरसतः संगच्छते नित्य
स्ववर्णोत्तेषु पौर्वापर्यं च पूर्ववर्णानुसंधानस्याव्यवहितोत्तरत्वसंबंधेन स्ववर्णानुसंधान वाग
स्फोरवस्य मानारोस्यासत्वात् तत्स्वविषयकानुसंधानविशिष्टानुसंधानविषयत्वरूपमिति वा गुपप

त्रिरिति एवं नानात्वं वृत्त्यतेन पाचवर्णसमुदायो वाचक इति पदस्फोटपक्षे पर्यवसानमिति प्रतिभाति ।
पाणिन्यादिसंकेतितेत्यर्थः पूर्वं तु आदेशस्मारितवर्णानां बोधकत्वनिरासेन प्रकृतिघटकप्रण
समुदायस्य प्रत्ययघटकवर्णसमुदायस्य च तस्य वाचकतोक्ता इदानीं तु मपघटकवर्णसमुदायस्ये
वृत्ति भेदः घटेनीति । घटेतिप्रकृतिरेनेति प्रत्यय इति प्रकृतिप्रत्यययोर्विभागस्य ज्ञानासंभवादि ति
योजनाः सर्वे सर्वे पदे ति वर्णानित्यताप्रतिपादकं भाष्यमेतन्न व्यर्थसादेश्यपि प्रसक्तादाह व्याजे
न नित्यपाचनिश्चिन तसाध्यघत्वस्येव दृष्टांतत्वे तंत्र त्वेन तस्य प्रकृत्याभिन्नत्वाभावेपि न दृष्टांतत्व
मनुपपन्नमिति भावः तत्र वस्तुसादृश्यलेविभागइति प्रकृतिप्रत्यययोः पार्थक्येन निर्णयः प्र
सर्वेः अस्य वैयाकरणानामपीतिशेषः परे तु आमसादौ प्रत्ययत्वस्य दृष्टत्वेन वामित्यादा
वामोवइत्यादावसादेः प्रत्ययत्वमितरांस्य प्रकृतित्वमनुमानं शक्यमिति नोक्तदोषा प्रकृतिप्र
त्ययसमुदायस्य वाचकत्वमिति द्विर्घटेनेत्यत्र तु न शब्दस्यार्थदेशत्वं भाष्यप्रक्रियोक्तमिति न नतच विभा

गतिर्णपासंभवोजघोंऽत्र चकारादिसादेरोत्वगमाशिष्यभाशंसुप्यमानार्थाभिधायीतित्यप्रकृतेरेव
वाचकताभ्युपगन्तुं वा न चापि सुप्रत्ययानुसंधानाद्बोधः प्रकृतेरेव वाक्यार्थविशिष्टप्रत्ययार्थलक्षणा सर्वे
सर्वपदादेशाइति तु वर्णानित्यत्ववादिनां दूरापास्तमेवेत्याह पुष्टेरेवात्र मयाम वाक्यस्फोटनिरू
पणमित्यभिप्रेत्य मत्मवतारयति सुप्तिङन्तेति न द्वाचकत्वं समुदायेइति पदसमुदायनये शक्यत्वर्थः
स्वमितिवाक्यशक्तिवादिन्यर्थः विशिष्टसत्त्वानुष्ठितं पेराम्भराय मानेऽपि सनेन न तत्तिष्टबोधकत्व
ज्ञानासंभवः सत्यंतेसमुदायव्युत्पत्तेति समुदायस्य वाचकत्वमहेरोत्यर्थः बोधानुपपदार्थविशिष्टो
तरपदार्थबोधानः तथापि सुप्तिङन्तपदे पिशक्तिरिति न प्रकृत्यनेत्यर्थः ननु घटेनेत्यादिमतेन
समपुत्तिकस्फोटद्वयांगीकारात् पदस्फोटे साध्येवाक्यस्फोटस्यदृष्टांतत्वं धिं च पदस्फोटासिद्धेरन्त द
र्थसंसर्गनपवाक्यार्थापमसिद्धायवाक्यार्थबोधकत्वनपवाक्यस्फोटकल्पनावसरइत्यपरितोषात्स्द
स्फोटमेवदृष्टान्तीकृत्य वाक्यस्फोटे साधयति वस्तुतइति न याचपत्रपदे ष्वेव पदार्थशक्तिग्रहात्स्यार्थ

भा॰ सा॰
२६१

पस्थितिसाकांक्षज्ञानादिसहकृतेनयावाक्यार्थबोधस्तत्रपदस्फोटोपयुक्तस्तत्संभवप्रदर्शनाभिप्रायादूरेवेत्या
दौतत्तात्पर्यावाक्यस्फोटेइतिव्युत्पत्त्यानवतिव्यवस्थितपदमहिम्नायघटपिस्फोटइत्यंव्यवस्थितमि
तिलभ्यतेतेनप्राप्यावश्यकवाक्यस्फोटेनैवोपपत्तौपदस्फोटस्यनापेक्षेतिमंद्यावस्फोटोनितिकंथंइतिमनसिधि
धाइतिबोध्यंवाक्यस्फोटस्यावश्यकतामेवदर्शयति। अन्यथेतिवाक्यस्फोटस्यानभ्युपगमेस्यार्थः तादृशेतिवा
क्यार्थबोधकत्वेनप्रसिद्धवाक्यत्यागेतिज्ञानरहितस्यापीत्यर्थः नसत्वेतुतत्राप्रसिद्धिर्घटइष्टव्येवेतिभावः बोधप्रसं
गः घटकर्मकानयनानुकूलकृतिबोधापत्तिः पदत्वेतिज्ञानजन्यपदार्थोपस्थितेःसत्वादितिभावः घट
मानयेत्यत्रैवेति। अत्रतादृशज्ञानुसतिरहितस्येत्यनुषज्यते। ननुशाब्दबोधकारणपर्यंतास्यप्यंतज्ञानत
पसहकार्यभावादेवनबोधोतआह। सत्यपीतिबोधाभावादितितादृशबोधाभावादितिभावः। न
पाचयदमावाक्यार्थाभावस्तस्यतद्धेतुतनापावाक्यशक्तिएवखिविवेतिभावः पूर्वंग्रंथेनकारणतयाहृतं टम
व्यतिरेकसहचारंप्रदर्श्यान्वयसहचारंप्रदर्शयन्वाक्यशक्तिव्यवस्थापयति। तत्रेति। घटमानयेत्यत्रैवेत्य

र्थः ननुवइत्यनेननत्वनुपसत्तोहेतुत्वस्यव्यवच्छेदः तादृशसाकांक्षज्ञानानिष्ठबोधहेतुत्वस्यैवास्मन्मते
वाक्यशक्तित्वेनाकांक्षासाक्षात्किरितिपरिभाषाभेदेपिवाक्यम्। किंनिरवाधेस्याशयेनाह नहीति।न
नुशाब्दबोधहेत्वर्थोपस्थितिजनकत्वंशक्तिभावपदस्थघनवाक्येनत्तिष्ठबोधकतापात्तादृशोप
स्थितजनकत्वादतआह। अपर्यापस्यापकेति। शाब्दहेतुनीति। शब्दनिष्ठपदोधुकारणत्वमित्यर्थः
नपयावेनपावेनतस्मादुपस्थितौशाब्दहेतुत्वानिवेशेननज्ञानस्यतादृशोपस्थितजनकत्वेपिन
हानिरित्यपिः। बोधकस्यशब्दत्वेनैवनिवेशादपभ्रंशस्यापिनासंग्रहइतिभावः ननुवाक्यस्फोट
वादिमतेवाक्यार्थस्यनानात्वात्स्वेष्टेनशक्तानंत्यंकिंचपदस्यापिवाक्यशक्तिग्रहंविनापिवाक्यार्थबो
धजननात्तद्वाक्यशक्तिग्रहस्यतद्धेतुतापांव्यभिचारः अतएववाक्यपक्षस्तुनेदानींप्रक्रांतः कार्य
तावच्छेदककोटावव्यवहितोत्तरत्वनिवेशेननहारस्तोप्यनुपस्थितसंसर्गेवाक्यशक्तिग्रहस्यवाद
बोधात्प्रागसंभवेनकार्यंतद्ग्रहस्यशाब्दबोधकारणत्वेसंभवइत्यर्थक्रिकमितिचेन्न इत्थं संसर्गस्य

विष्यानुपस्थितावपि तद्धाद्विचकारकविभक्तिविशिष्टधातुपदं कारकविशिष्टक्रियाबोधकमिति सा
मान्यतस्तद्धानताऽसत्त्वं ग्रहस्यच यात्यैवमेव वाच्यत्वात्। अनेनेतरं पदविशेषसमभिव्या
हारेणतात्पर्यविषयसंसर्गविशेषेणतत्कारकविशिष्टतत्क्रियाभानं। नापि संसर्गोनेत्यमयु
क्तत्वात्तमानं। संबंधत्वस्यानुगमकस्य सत्वात्तत्पदघटितसमभिव्याहारस्य नियामकत्वात्
मयोः समैवेतितन्मननिकर्षः नतुस्यादेवोकप्रकारेयद्विवाक्यनिष्ठबोधकतायाः शक्तित्वं सप्र
मारात्स्यानदेवतु नेत्यतआह। युक्तंचैतदिति। एतत्। वाक्यनिष्ठबोधकत्वस्य शक्तित्वं युक्तिमेवा
ह विषयतेति शाब्दबोधमात्रे। तत्सामान्यइत्यर्थः इतिज्ञानस्येतिवृत्तिज्ञानजन्योपस्थितेरित्यर्थः
विषयतासंबंधेनेत्युनषज्यतेः लाघवादिति। अन्यथा घटपदशक्तिमदिदंपदमित्यज्ञानवतोप
क्तिविषयशक्तिज्ञानतो घटमानयेति वाक्याद्बोधापत्या घटशाब्दबोधे घटार्थकपदवृत्तिज्ञानज
न्योपस्थितित्वेन हेतुतावाच्ये सर्वं भेदेनानंतकार्यकारणभावकल्पनेगौरवमस्मन्मतेतुवि

षयतासंबंधेनघटेवृत्तिज्ञानजन्योपस्थितिसबाच्छेत्सर्वभेदेनानंतकार्यकारणभावकल्पनेगौर
वमस्मन्मतेतुवाक्यान्तशाब्देतस्यभानमितेकस्यैवकार्यकारणभावः कल्प्यतइतिलाघवादित्यर्थः।
ननुघटघटत्वयोर्विशेष्यविशेषणभावे विपरीतस्तुसत्वस्य घटमात्रोपस्थितौ घटत्वविशिष्टबोधवार
णाय घटत्वविशिष्टबोधे घटपदवृत्तिज्ञानजन्यघटत्वविशिष्टोपस्थितेर्हेतुतायाअवश्यवाच्यतयातस्
यानतिप्रसंगइत्यकार्यकारणभावेमानाभावोनत्याह विवेचितंचेतदिति। पदपदार्थभेदेनानं
तकार्यकारणभावेषु वृत्तिप्रवेशमपेक्ष्योपस्थितेः पदज्ञानजन्यत्वेनैवशाब्दसामग्रीकुक्षौ
प्रवेशावश्यकतयाऽसतिसवार्पकशक्यजनकतयोपस्थितस्य देवदत्तादेश्च शाब्दे भानवारणा
यविषयतयाशाब्दसामान्येवृत्तिजन्योपस्थितेर्विषयतयाहेतुत्वंवाच्यं। एवंचसंसर्गस्यशाब्देभ
नानुरोधेनसंसर्गेपिवृत्तिकल्प्यसामान्येवृत्तिजन्योपस्थितेर्विषयतयाहेतुत्वंवाच्यं। एवंच
संसर्गस्यशाब्दे भानानुरोधेन संसर्गेपिवृत्तिकल्पनमावश्यकंतत्पायपदैःपदार्थानांवाक्ये

श॰वि॰
१६३

तथाच्यार्थस्य बोधइत्तिन विशेष्यविशेषणाव्यसासेन शाब्दबोधेपदार्थानांभानं पदोपस्थित
नामेवसंसर्गस्य वाक्यशक्त्याबोधादिति नन्वविचिनं वस्तुतस्तु वृत्तिज्ञानपदंपयाम्ब्रतार्थकमेवव
त्तिज्ञानस्येसनंतरमनुषक्तविषयतासंबंधेनेसस्पवृत्तिज्ञानविषयबोधकत्वघटकबोधीप
विषयतासंबंधेनस्पर्धः अन्यथावाक्यवृत्तिज्ञानजन्योपस्थितेरेव शाब्दबोधत्वेन तस्मिंस्तेन
संबंधेनन हेतुत्वासंभवेनवावपशक्येगर्भत्वाचादिति बोध्यं अन्मवदेति पदजन्यपदार्थोपस्थि
तिमंतरेणशाब्दबोधानुदयात्तादृशपदार्थोपस्थितेः शाब्दबोधेहेतुतेतितावन्निर्विवादं पदस्य
वपहूत्याघात्मकस्यार्थे संबंधंविनातदुपस्थापकत्वासंभवान्नास्तिहस्मात्मकसंबंधोप्यावश्य
कस्तथा। नतु तत्समुदायरूपपारिभाषिकपदस्य तत्समूहरूपवाक्यस्य विशिष्टार्थेसः तंमविनापिने
मन्याकांक्षादिरूपकारणसमवधानादेव विशिष्टबोधोपपत्तेः स्कृपुदार्थेविशिष्टापरपदार्थपशा
दतस्यैवतस्माप्यनावच्छेदकत्वातः यत्तुलाघवाद्वृत्तिज्ञानजन्योपस्थितेर्विषयतासंबंधेनहेतुत्व राम १६३

मेववाक्यशक्तौप्रमाणमितिचेन्न। स्वातंत्र्येण तद्धेतुत्वस्यैवासिद्धेः तथाहि। नादृशकार्यकारणभावेवृत्ति
त्वेनपदवृत्तेर्निवेशः किंवावाक्यवृत्तेः किंवावृत्तिमात्रस्य। न तावदाद्यः पदवृत्तिज्ञानजन्योपस्थितेःशा
ब्दहेतुत्वस्यसर्वैरेवाभ्युपगमात्। नद्वितीयः वाक्यवृत्तेस्ततःप्रागसिद्धेः अतएवनतृतीयः किंवत
चमनेवाक्यशक्तिजन्योपस्थितेः शाब्दबोधात्मकत्वेन तस्मिन्तज्जनकत्वासंभवादपिनोक्तरीतिःसाधीय
सी। अपिचवाक्यवृत्तिज्ञानस्यशाब्दसामान्येनस्वतंत्र्येणहेतुत्वेघटादिपदशक्तिज्ञानजन्यपदार्थो
पस्थितिदशायांघटमानयेतिवाक्यशक्तिमविदुषअप्याकांक्षादिवशाच्छाब्दबोधोदयेनव्यभिचारात्तयु
दपिसमभिव्याहारतयाकांक्षैववाक्यमितिनदूपिन। तथासतिघटीपाकर्ममेनेत्यादिबोधेघटमानयेति
वाक्यंसाकांक्षं निराकांक्षंवघटःकर्मत्वमित्यादिसर्वसिद्धव्यवहारानुपपत्तिः पदयोः समभिव्याहारद्वि
वृत्यदयोर्वाक्यमितिव्यवहारप्रसंगश्चेतिसमभिव्याहृतपदानामेववाक्यत्वमुपगंतव्यं। तथाचसम
भिव्याहारस्यशाब्दबोधहेतुत्वेपिवाक्यस्यतत्वंदुरूपपादमेवेति न वाक्यशक्तिसिद्धिः समभिव्याहारनि

म॰ ष॰ छाबोधजनकत्वग्रहवतो बोधात्तज्ज्ञानं हेतुरिति सपिरितं वचः अन्वयव्यतिरेकाभ्यां समभिव्याहारज्ञानस्यै
१६४ वशाब्दधीहेतुत्वेन नान्वितबोधजनकत्वज्ञानस्य हेतुतापारस्वाभावात् न च तदपि संभवति शाब्दबोधात्प्रा
क्संसर्गस्यैवानुपस्थितेः सामान्यतस्तदुपस्थितावपि विशेषरूपेणाभानार्थं तात्पर्यज्ञानाद्युपेसर्गे
च्वमलशैघ्रिस्मात्तवाक्यशक्तेरेवासिद्धापत्तिः वक्ष्यमाणरीत्या शाब्दबोधाव्याकूतदुपस्थित्यभ्युपग
मे वाक्यवृत्तिज्ञानजन्योपस्थित्यनंतरं शाब्दबोधाभ्युपगमेवा शब्दप्रामाणापभंगापत्तिः। अनधिग
तार्थग्रहकरणस्यैव प्रमाणत्वात् अत एव सन्नहनात्कृतद्वितसमासाख्येसन्नसमासग्रहणोक्तं
वाक्यशक्तौ नतु दूषयं स्पष्टयेव सामयिकः शब्दार्थयस पदृत्तिकरणालोके वोकाशक्तिग्राहको नृश
सनादेरभावेन तद्ग्रहासंभवाच्चेति वाक्यस्फोटस्यापातरमणीयत्वेति पर्यालोक शक्तिग्रहप्रकारस्वशोप
स्यंमनस्सिनिधापनस्मिन्प्रकारांतरवंकुमग्निमग्नपइस्साशयेनाहाननुवितिः अपर्वत्वात् शाब्दबोधा राम
प्रागनुपस्थितत्वात् ननु शाब्दबोधस्य पूर्वं पदमत्रस्याद्युपस्थितपदार्थनिरूपितशक्तिग्रहसुलभत्वेति १६४

पदे समभिनिविष्टत्वमनुपपन्नमतस्तदाशयं प्रकाशयति। पदस्यैवेति। पदज्ञानामेवान्वितपदार्थे शक्तिरन्वयम्भुसा
मान्यरूपेणज्ञातः अत एव घटादिपदादन्वितघटाद्युपस्थितौ नियमेन तत्प्रतियोग्याकांक्षा भवति किमन्वितो घ
टः किमन्वितं कर्मत्वमित्याद्याकारा सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वात्
विशेषरूपेणभाने त्वमादिपदसमभिव्याहारेणोनियामकेन तस्य च तस्य शाब्देभानं पदृत्तिविषयत्वात्। अशक्य
स्यापि भानेति प्रसंगात् न चैवं घटमानयेत्यत्र तत्तदन्वितं कर्मत्वमिति रीत्यानेकधा संसर्गस्य भानापत्तिः
ततस्तत्पदेभ्यस्तत्पदार्थोपस्थितावप्याकांक्षावशादेकधैव तस्य ज्ञानसंभवात् न चाकांक्षापारस्त्यज्ञानपाम
कत्वावश्यकत्वे तत्रस्तु इति कल्पनापार्थेनिवाच्यं। अशक्यभानमभियेब नतदभ्युपगमात् न याचपरशक्तेः
च संसर्गभानोपपत्तेन्न त्रयावाक्यशक्तिः पदवाप्य सपावाक्यस्य गुरुत्वाच्चेति तन्मते। नयावान्विताभि
